R S V L
00999
59
178/XXXIII
999

Registered No M 2300.

Book XXXIII ॥ श्रीः ॥ No. 1

९९९

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

—:o:—

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३३] कलि ५०५८ विकारि - कन्या [ सं १

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

SEPTEMBER, 1959

A 32

In case you have not received the previous number please inform the Editor or Publisher immediately.

पत्रिकामूल्यं निश्शेषं प्रेष्य उपकर्तव्यम् ।

**Kindly help the poor journal by sending the arrears of your subcription**

For the rate of subscription please see inside.

# UDYANA PATRIKA.

Annual Subscription Rs. Three only

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं त्रीणि रूप्याणि।

२ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।

३ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।

४ एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।

५ प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।

६ एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)

७ लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* D. T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयाः ॥

1 श्री विघ्नेश्वरवृत्तमालास्तवः
2 भावनिष्यन्दः।
3 वधूविनिश्चयः।
4 रामराज्यम्।
5 मुकुन्दमाला
6 शरणागतिः।
7 प्रकृतिभेदः।

तेऽपीश्वरास्त्रयस्त्वत्पदपङ्कजसेविनः क्रियासिद्ध्यै ।
दैवं निहन्म इति हि स्फुरन्ति किं तत्त्वयाऽसाध्यम् ॥ २१ ॥
आर्या

वृक्षभञ्जनरुचिः करस्तव त्वं च भक्तपरिपालनोत्सुकः ।
स्फारमेनमवरुज्य मामकं विघ्नकाननमुपैहि निर्वृतिम् ॥ २२ ॥
रथोद्धता

प्रसन्नवक्त्रस्त्वं नित्यं सदा दानप्रवर्तकः ।
सर्वसिद्धिप्रदः किञ्च त्वां विना कमुपास्महे ॥ २३ ॥
अनुष्टुभ्

तव कर्णतालपवनोर्मिसन्तति-
मदवारिपूरकटुसौरभः कदा ।
प्रतिवारणानिव निवारयिष्यति
प्रतिबन्धकान्मम मनःप्रमाथिनः ॥ २४ ॥
मञ्जुभाषिणी

मम रक्षणे श्रमलवोऽपि न ते
वरवाहनं प्रहिणु किञ्चिदमुम् ।
मम विघ्नजालमतिदुःखकरं
क्षणमात्र एव स विकर्तयति ॥ २५ ॥
प्रमिताक्षरा

सदैव दानार्द्रकरस्त्वमर्थिनो
वरान्प्रदातुं प्रतिपालयन्स्थितः ।
अपूर्ववृत्तः प्रतिभासि नाथ मे
यदर्थिभावं व्रजसि त्वमर्थिषु ॥ २६ ॥
वंशस्थम्

दातुमेव समुदञ्चितहस्तो दानवारि च विसृष्टमथासिन् ।
केन भञ्जयसि जानुयुगं नः कुट्टनं शिरसि चापि किमर्थम् ॥ २७ ॥
स्वागता

अथवा कृतभूरिपाप्मना-
मवशित्वादनुपाहतात्मनाम् ।
लघु कायपरिश्रमं भवान्
परमां कल्पयसीव निष्कृतिम् ॥ २८ ॥

वियोगिनी

ओंकाररूप भगवन्निखिलार्थसिद्धि-
घण्टापथप्रथमशुल्कमिमं प्रणामम् ।
गृह्णीष्व विघ्नपरिघामपवाहयद्राग्
यस्यां मनोरथशतं मम भग्नमासीत् ॥ २९ ॥

आदत्स्व मोदकगणान् कृपया त्वमेतान्
मूतान् प्रमोदकदनानिव पाप्मनां मे ।
तुभ्यं निवेद्य दलितस्य च नारिकेल-
स्यानुव्रजन्तु सरणिं मम विघ्नसङ्घाः ॥ ३० ॥

वसन्ततिलकम्

विनिहतविविधोद्यमप्लवाना-
मकरुणदैवयुगान्तमारुतेन ।
ध्रुवमिदमवलम्बमङ्घ्रियुग्मं
तव गणनाथ गतिर्ममास्तु नित्यम् ॥ ३१ ॥

पुष्पिताग्रा

सिद्धारम्भं स्फारविद्याविलासं
मेधावर्चःश्रीयशश्शोभमानम् ।
कुर्वन्तु त्वत्पादपाथोजलग्ना-
स्सौभाग्यानां भाजनं पांसवो माम् ॥ ३२ ॥

शालिनी

एष खलु वृत्तमालास्तवो महालिङ्गशर्मणा कविना ।
विघ्नेश्वरप्रसादं कामयमानेन संग्रथितः ॥

# अथ भावनिष्यन्दः ॥

श्री महालिङ्गशास्त्रिणा विरचितः

प्राचां वाचां यदि भणितयः प्रोद्यतास्तत्र सीद-
न्त्यद्रेः पुत्र्या यदि न विदितस्तस्य माहात्म्यपारः ।
पुम्सां किं स व्यपगतगुणो देवदेवोऽभिवर्ण्यो
मत्तो मत्तः क इव स भवेदुद्यतस्तत्त्ववार्थम् ॥ १ ॥

चूडापीडो हिमकरकला पन्नगाः कङ्कणानि
प्रेता वाचः शुनकपूतना केलिमुख्याः पिशाचाः ।
गात्रं भस्मच्छुरितमपि च क्रीडतो यस्य चित्रं
कल्पान्ते तं कमपि पृथुकं सन्ततं चिन्तयामि ॥ २ ॥

भस्मीकर्तुं प्रभवति जगद्यस्य तेजः कठोरं
यस्यार्चिस्सु स्मरहुतवहः कल्पते स्मेन्धनाय ।
शम्भोर्यश्च प्रलयसमये संस्थितेष्वन्यतेज-
स्स्वेकः फाले ज्वलति हुतभुक् घस्मरं तं स्मरामः ॥ ३ ॥

कल्याणानां निधिरचरमः कुत्सिताचारकोऽपि
व्यक्तं गीतः श्रुतियुवतिभिर्यो विगीतोऽपि वृत्तैः ।
वामे वामासततकलितोऽप्यग्रगण्यो यतीनां
भिक्षाटोऽपि प्रणतधनदः सोऽवतान्मां प्रपन्नम् ॥ ४ ॥

स्वैराश्लिष्यद्विबुधतटिनीवीचिकाखेलदिन्दुं
घृष्यद्भूषाभुजगविधुतास्तोकभस्मोपलिप्तम् ।
अङ्कासीनप्रियसहचरीवक्त्रसंसक्तदृष्टि
स्वच्छच्छायं श्रयतु नियतं देवदेवं मनो मे ॥ ५ ॥

कारुण्यम्भःप्लवनतटिनी कापि कल्याणवल्ली
कामोत्सेकप्रशमनपरा नाथिता कामदोग्ध्री ।
उत्तंसीयन्त्यकृतकवचःकामिनीकुन्तलेषु
प्रत्यासन्ना भवतु हृदये शाश्वती कापि मूर्तिः ॥ ६ ॥

द्रागुन्मीलद्धिमकरकलादर्शनीया नितान्तं
स्वर्वाहिन्या अकलुषपयःपूरपूतोत्तमाङ्गा ।
स्वच्छाकाशप्रचुरसुषमा देहिनां भव्यहेतुः
शम्भोर्मूर्तिः परिकलयते शारदीमम्बराभाम् ॥ ७ ॥

ऐभीं कृत्तिं कटिपरिसरे स्वाहतास्रां वसानः
श्रुत्युक्तीनां चिकुरकुहरेष्वप्रधृष्यः शयानः ।
स्वेषु स्वेष्वध्वनि नियमयन् प्राणिनः प्राभवेण
श्रेयो मह्यं वितरतु शिवः कोऽपि पञ्चाननोऽसौ ॥ ८ ॥

अन्तःकण्ठं नियमितविषज्वालया दुर्निरीक्ष्यः
चूडारत्नद्युतिमयझरीसान्द्रसिक्तोत्तमाङ्गः ।
स्वच्छाभोगः परुषनिगमप्रान्तकान्तारवासी
भोगी कोऽपि प्रणतजनताभोगहर्ता चकास्ति ॥ ९ ॥

विश्वोत्पत्तिस्थितिविलयनप्रक्रियासु स्वतन्त्रं
विश्वत्राणाविरतनिरतं विश्ववेदार्थगम्यम् ।
विश्वासस्य प्रकटितफलं वामभागे महेशं
विश्वानिष्टप्रशमनपरं विश्वरूपं नमामि ॥ १० ॥

# उद्यानपत्रिका ॥

''अन्या वाचो विमुञ्चथ''

वेदापहारविक्रोशद्वेधः खेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु ३३] कलि ५०६१ विकारि - कन्या [सं १


## वधूविनिश्चयः ॥

(संस्कृतप्रतिभायां प्रकाशितपूर्वः)

१

मल्लीपुराभिजनो माधवमिश्रः कुलशीलविद्याविनयैः, गृहारामक्षेत्रैः, सुपुत्रदुहितृकलत्रैश्च सम्पन्न आसीत् । गम्भीररमणीयाकृतिः, अरोगदृढगात्रः, बन्धुजनप्रियः, सर्वसुहृत्, दीनानुकम्पी, सकलपौरजनबहुमतः, रसिकाग्रणीः, सहृदयसार्वभौमः सः शास्त्रविहितकर्मकलापानुष्ठानेन, देवार्चनेन, अभ्यागतसमाराधनेन, अर्थिजनमनोरथपूरणेन, विपश्चिदपश्चिमाविष्कृतविलक्षणवैचक्षण्याभिनन्दनेन, उत्तमकविमुखोद्गतसुधास्यन्दिसूक्तिरसास्वादेन, निर्यन्त्रणोदयभक्त्युद्रेकविजृम्भितवाचालभावभागवतप्राग्रहरोदीरिताद्भुतभगवत्कथाश्रवणेन, भगवद्भागवताचार्यमहापुरुषावतारतारकादिविविधनिमित्तकोच्चावचोत्सवविशेषप्रवर्तनेन च कालं सकलं सफलं क्षिपन् नाकिनाथ इव नाके सुसुखं चिरमुवास । अथ कदाचन तस्य निकेतने स्थितिविपर्यासः कश्चन पदमधत्त । सर्वे यथापूर्वं स्वं स्वं कर्म चक्रुः । अथापि यन्त्रवत् ते चेरुः; जीवद्दशा मनागपि न ददृशे । न कश्चनान्येन संललाप । न कश्चन जहास । न कश्चन चिक्रीड । दिवा दिवाकरो नक्तं दीपाश्च बहवो जाज्वलयन्ते स्म । तैरनपनोद्यं तु किमपि गाढं तमो वेश्म तत् कृत्स्नमानशे ।

इदमत्र कारणम् । माधवमिश्रस्य पैतृष्वसेयो वसुनन्दः कार्यविशेषेण मल्लीपुरमागतः द्वित्राणि दिनान्यस्यातिथिर्बभूव । विवाहोचितवयस्कं माधवमिश्रस्य पुत्रमवलोकितवान् सः स्वपुत्रीहेतोः वरान्वेषणव्यग्रं स्वकीयं स्यालं स्मरन् संल्लापावसरे माधवमिश्राय तां कन्यां तद्वधूभावमर्हन्तीमावेदयामास । सद्यस्तेनोक्तं कन्याया जातकं प्रसमीक्ष्य आनुरूप्यं पश्यन् माधव-

मिश्रः तामात्मनः स्नुषां कर्तुं प्रायो निश्चिकाय । अथ प्रतिप्रयाते वसुनन्दे कदाचित् भोक्तुमुपविष्टः सः स्वगृहिण्यां तस्याः कन्यायाः प्रस्तावमकरोत् । ततः सा 'भिन्नोदरभ्रातुरपि मे अस्ति काचित् कन्या । साऽपि चिन्तयितुमर्हा' इति निवेदयामास । अनन्तरक्षणे उत्थिता घोरा महती वात्या माधवमिश्रस्य चित्ते । अत्यन्तमप्रकृतिं गतो बभूव सः । भूताविष्ट इव, यः कोऽपि राक्षस इव, ददृशे । क्रोधाग्निना जज्वाल । "मम वा अस्मिन् गृहेऽधिकारः, तव वा" इति जगर्ज; उच्चैराक्रोशन् अन्यच्च बह्वाह, येन गृहं सर्वं कम्पमानमिव, पिपतिषदिव, समपद्यत । न परं तस्य गृहिणी, अन्येऽपि सर्वे चित्रलिखिता इव चिरमतिष्ठन् । असमाप्त एव भोजने स हस्तं धूत्वा उत्थायागच्छत् । तदाप्रभृति उपहतश्रीकं तत् सदनम् । न तु तद् बाह्यो जनो यः कोऽपि वेद ।

२

मल्लीपुरे द्वौ भ्रातरौ, कुलीनौ, अक्षरज्ञौ, अदरिद्रौ, जनबहुमतौ आस्ताम् । तयोस्तु कश्चन विवादो वर्षगणानुवृत्तः । वार्धके दायं विभज्य ताभ्यां दत्त्वा तयोः पिता स्वपत्न्याः ज्यायसः पुत्रस्य गृहे स्थितिमादिश्य स्वयं कनीयसो गृह उवास । अथास्मिन् दिष्टान्तं गते अनेन स्वपूजाहेतो स्वस्मिन् रक्षितं सालग्रामं प्रति भ्रात्रोर्विप्रतिपत्तिरभूत् । ममेति ज्यायानभिनिविष्टः, ममैवेति कनीयान् । एतत्प्रशमनं प्रति बन्धुभिः सुहृद्भिश्च कृतस्तीव्रोऽपि प्रयत्नो न फलेग्रहिरभूत् । अथ काले गते व्यवहारप्राप्तास्तयोः पुत्राः सर्वयोग्यताशालिनोः स्वपित्रोरवदाते यशःशरीरे अनेन एकेन विवादश्वित्रेणोपजनितां विक्रियामसहमानाः तयोरेव चरणयोर्निपत्य तत्प्रशमनोपायोपलम्भं ययाचिरे । 'वयं वा त्याज्याः, विवादो वा' इति तैः सनिर्बन्धं प्रार्थितौ तावुभौ तनयदाक्षिण्यभङ्गाक्षमतया "मान्येन मध्यस्थेन केनचित् समुचितहेतुनिर्देशपूर्वकं क्रियमाणो निर्णयः आवाभ्यामङ्गीकरिष्यते" इत्यवोचताम् । एतेन प्रीताः पुत्राः वृद्धैराप्तैः सम्मन्त्र्य माधवमिश्रं विवादनिर्णेतारं अवृण्वन् ।

३

अनिष्ठुरप्रकृतितया कठिनेऽपि विवादे निर्णेतृपदमङ्गीकृतवन्तं माधवमिश्रं निर्णयहेतूपलम्भचिन्तासन्ततिर्बलवद् व्यथयामास । पूर्वमेव स्वगृहवृत्तान्तोपजनितया निर्निद्रतया पीड्यमानः सः तदानीं नितरां निर्निद्रो बभूव । अन्ततः स मेने— इमौ भ्रातरौ एकैकश आहूय तयोर्जन्मप्रभृति अद्यावधि चरितं तन्मुखादेव श्रोष्यामि । तत्र यः कोऽपि निर्णयहेतु

रुपलभ्येतेति। तथा चकार च; हन्त दृष्टं निर्णायकमिति जहर्ष च। ततस्तौ भ्रातरौ तयोः पुत्रान् बन्धून् सुहृदः अन्यांश्च जनान् सन्निपात्य तेषां समक्षं स्वकीयं निर्णयमेवमुदीरयामास—

इमौ भ्रातरौ विद्यायां पितृभक्तौ गुणेषु च समानौ। अथापि एकं विशेषमाश्रित्य प्रकृतविवादनिर्णयः सुकरो भवति। इत उपत्रिंशेभ्यो वत्सरेभ्यः पूर्वं अनयोः पिता कनीयसो गृहे समतिष्ठत। ततश्चतुर्भ्यो वत्सरेभ्यः पूर्वं ज्यायसो गृहे जननी। जननीमरणानन्तरं ज्यायसा पितृ-भरणे भागिना भवितव्यम्। स तु तदानीं तूष्णीक आसीत्। चतुरो वत्सरान् कनीयान् स्वयमेकः पितरं भृतवान्। तस्मात् तस्य स्वं स एव प्राप्तुमर्हति। मातृमरणात परं जीवतः पितुः शुश्रूषां प्रति अकृतचिन्तो ज्यायान् तन्मरणानन्तरं तदीये वस्तुनि स्वत्वबुद्धिं न कर्तुमर्हतीति। सूक्ष्म-प्रसरा बुद्धिः, हृदयङ्गमो निर्णय इति सर्वे माधवमिश्रमभ्यनन्दन्।

४

एवं परगृहविप्रतिपत्तिप्रशमने दृष्टं स्वयत्नसाफल्यं माधवमिश्रस्य स्वगृहविप्रतिपत्तिप्रशमने कुतो न यत्नः कर्तव्य इति विमर्शमुत्पादयामास। "आत्मा तावत् सर्वतः श्रेयान्। कामेन क्रोधेन वा तस्य क्षोभो यथा न भवति, तथा विवेकिभिः स रक्षणीयः। एवं सति कृतप्रज्ञौ तौ भ्रातरौ सालग्रामनिमित्तं कुतः सौमनस्यं जहीतः? कुतो मिथो वैरायेते?" इति यत् प्राक् स्वयं तौ भ्रातरौ मनसा उपजहास तत् किं स्वस्मिन्नान्वेतीति परामर्शे स प्रावर्तत। मयि काञ्चन कन्यां निर्दिष्टवति यदि मे गृहिणी अन्यां काञ्चन निर्दिशति, तत्र तस्यां कोऽपराधः? किं मे हीयते? विवाह-प्रसङ्गे हि नैकाः कन्याः परिचिन्त्यन्ते। न च प्रतिपक्षभावे स्थितया अभि-निविष्टया वा तया कन्यान्तरनिर्देशोऽक्रियत। कुतो मे प्रलयदशाप्रसञ्जन-संरम्भिणो मृत्योरिव दुर्धरः क्रोध उदजृम्भत? इति स्वगृहदुरवस्थानिदा-नस्य स्वक्रोधवेगस्य हेतुमन्वेष्टुमारभत। यथा यथा निदध्यौ तथा तथा स्वगृहिण्या अत्यन्तमनपराधितां, आत्मनः अत्यन्तं दुष्कृतकारितां चाव-धारयामास। 'धिङ् मे अविवेकितामाकस्मिकक्रोधान्धतामविमृश्यकारि-तामस्थानपरुषतां च' इति आत्मनो भृशमजुगुप्सत। 'हा हन्त, शश इवा-शनिं पिपीलिकायामिव अङ्गारधारां तस्यामतिरूक्षां, अतितीक्ष्णां वाचं व्यसृजमिति पर्यतप्यत। अहो बत आ बाल्यात् मम प्रियहितकारिणी मदेकशरणा साध्वी सुकुमारप्रकृतिः सा अतर्कितं झटिति राक्षसीभूतस्य

मे तामधिक्षेपवाचं श्रुतवती किं मेने ? कथमासीत् ? किं मुमूर्छे ? किमुन्मत्ता बभूव ? इति चिन्तयतस्तस्य हृदयं व्यदीर्यत। एवं चिरानुभवानन्तरं किञ्चित्प्रशान्तदैन्यः क्रमेण प्रत्यागच्छद्धैर्यो माधवमिश्रः स्वकर्तव्यपद्धतिं मनसोल्लिख्यावतस्थे।

५

मल्लीपुरभगवदालये महान् वार्षिकोत्सवः, यत्सेवार्थं नानादेशजना लक्षशो मिलन्ति, पौरैराहूताश्च तद्बन्धवः सुहृदश्च एकैकस्मिन् गृहे दश दिनानि निबिडनिबिडं वसन्ति। माधवमिश्रः स्वबन्धुभ्यः सर्वेभ्य आह्वानं प्रेषयामास, विशिष्य च स्वपैतृष्वसेयस्यालाय, स्वगृहिण्या भिन्नोदरभ्रात्रे च — कृत्स्नेन कुटुम्बेन सह आगन्तव्यमिति। स्वयमुत्सवसेवनोत्सुकाः प्रेमनिर्भरेण आह्वानेन प्रोत्साहिताश्च माधवमिश्रस्य सन्निहितव्यवहिताः सर्वे बन्धवो मल्लीपुरमागच्छन्। तैरापूरितं माधवमिश्रस्य महद् गृहमुत्तरङ्गसमुद्रदशां प्रपेदे। गृहजनाः सर्वे अन्तः सव्यलीका अपि बहिस्तदप्रकाशयन्तः सहजवृत्त्या सर्वमाचरन्। भगवत्सेवनेन, भागवतगोष्ठीसमागमेन, वेदघोषभगवन्नामगीतवाद्यविशेषश्रवणेन, प्रेक्ष्यप्रेक्षणेन, रसिकसंल्लापेन च जनानां आनन्दमयः कालः अविदित एव गच्छन्नासीत्। माधवमिश्रस्य तु तयोः कन्ययोरन्तरदर्शने एकत्र दृष्टिरलगत्। उभे रूपवत्यौ। अथापि स्वभावे विशेषमजिज्ञासत। क्व गच्छतः, किं कुरुतः, कैः सम्भाषेते ? इत्यनन्यविदिदं निपुणमवहितः समैक्षत। एका स्वालङ्करणादिमात्रप्रसिता उत्सवदर्शनप्रधाना स्नानाशनपानासनशयनहेतोरेव गृहमाश्रयन्ती केवले अतिथिभावे व्यतिष्ठत। इतरा पुनः गृहजनाभ्यन्तरीभूय गृहप्रसाधनाय वा पाकाय वा अतिथिसमाराधनाय वा यत्र यत्र कर्तव्यं तत्र सर्वत्र स्वयं सोत्साहमन्विता, गृहजनवत् गृहस्य पुरस्तात् वीथ्यामागतस्य भगवतः सेवनमात्रेण तृप्ता सर्वसाह्यकारिणी सर्वप्रीतिपात्रमभवत्। इयं गृहिण्या भिन्नोदरभ्रातुः पुत्री। अस्यामिमं विशेषमुपलभ्य माधवमिश्रो मुमुदे। इमामेव आत्मनः स्नुषां कर्तुं निरचिनोत्। इमं निश्चयमेव उपायनीकृत्य गृहिणीं दृष्ट्वा तस्यां क्षमा प्रार्थनीयेत्यध्यवस्यति स्म।

६

भगवदुत्सवावभृथो निरवर्तत। बान्धवाः स्वं स्वं स्थानं प्रत्यगच्छन्। माधवमिश्रः रात्रौ अन्येषु शयितेषु स्वपत्नीशयनगृहमगच्छत्, ससंभ्रममुत्थाय तिष्ठन्तीं तां समबोधयच्च —

माधवमिश्रः— प्रिये !

गृहिणी— इयमस्मि दासी।

माधवमिश्रः— अहमपराधी। त्वं मां क्षन्तुमर्हसि।

गृहिणी— (कर्णौ पिधाय) शान्तं पापम्। दुःश्रवा मे इमा वाचः।

माधवमिश्रः— विना कारणं त्वां परिभूतवानस्मि। तस्यापराधस्य कोऽन्यः परिहारः ?

गृहिणी— सर्वथा प्रभवति भार्याया भर्ता। कः प्रसङ्गोऽपराधस्य ? असत्यपराधे तत्परिहारान्वेषणं अभुक्तविषचिकित्साप्रयासः।

माधवमिश्रः— यदि मे नापराधः कथं कुपितासि ?

गृहिणी— का कुपिता ?

माधवमिश्रः— त्वम्।

गृहिणी— नैव। नाहं कुपिता। सत्यं ब्रवीमि, त्रिर्ब्रवीमि, नाहं कुपिता।

माधवमिश्रः— कथं तर्हि मया न सम्भाषसे ?

गृहिणी— आर्यपुत्रो यदि मया असम्भाषणसङ्कल्पं कृतवान्, तस्य भङ्गो मा भूदिति।

आत्यन्तिकं पतिपारतन्त्र्यं व्यञ्जयन्तीमिमां गृहिण्या वाचं श्रुतवान् माधवमिश्रः आश्चर्यमिति वा अनुराग इति वा भीतिरिति वा भक्तिरिति वा निर्वक्तुमशक्यया कयाचिद्‌लक्षणया चित्तवृत्त्या विवशीभूतचेताः सगद्गदं व्याजहार— “अयि कल्याणि! यथा यथा त्वमतिपरिशुद्धमत्युदारमलोकसामान्यमात्मनः स्वरूपमाविष्करोषि तथा तथा किमपि मया त्वयि कर्तव्यमिति मे दृढा मतिरुदेति। किं कर्तव्यमिति तु न जानामि। युक्तं हठात् त्वामाकृष्य गाढमाश्लिष्य चुम्बितुम्। किन्तु ‘न त्वं सामान्या स्त्री, अपि तु प्रत्यक्षा काऽपि देवता’ इति बुद्धिर्मां ततो निवारयति। पादयोस्ते पतितुमिच्छामि। तत्पुनस्ते अत्यन्तमप्रीतये कल्पेतेति भीतिर्मां निरुणद्धि। अयि स्त्रीणामनुत्तमे उत्तमे, मत्कुलदेवते, यत्किञ्चिदादिश, यत् कृत्वा स्वस्थमना भवेयम्।

गृहिणी— पूर्वं यथा प्रबलः क्रोधः तथा सम्प्रति अपराधित्वधीः अस्थानोदिता आर्यपुत्रं बाधते। अनर्थकरीमिमां धियं द्रागवधूय विधेयामिमां किङ्करीं पुत्रं दुहितरं परिजनांश्च यथापूर्वं तेषु तेष्वर्थेष्वादिश्य परि-

चर्यां कारयित्वा सम्पूर्णः स्वामिभावः प्रकाश्यताम्। मनःकालुष्यमपैष्यति। स्वास्थ्यं सम्पत्स्यते।

माधवमिश्रः— अहो मे मौर्ख्यं, यत् यत्नेन बुद्धौ धृतमपि विस्मृतवानभूवम्! दैवादद्य वा तत् स्मृतिपथमवतरति। अयि कल्याणि! तव भिन्नोदरभ्रातृपुत्रीमस्मत्स्नुषां कर्तुमिच्छामि। तत्र सम्मतिं देहि।

गृहिणी— सा वा अन्या वा, आर्यपुत्रस्य याऽभिमता सा नः स्नुषा भवतु। नास्यां मम अत्यादरः, नाप्यन्यस्यामनादरः। सर्वथा आर्यपुत्रानुरोधिनी अहम्।

माधवमिश्रः— वक्रोक्तौ मे द्वेषः। ऋजु ब्रूहि सम्मतमिति।

गृहिणी— सम्मतम्।

माधवमिश्रः— "अद्य मे शान्तं मनः। अद्य स्वस्थोऽस्मि" इत्यभिधाय गृहिणीं शयनाय आदिश्य स्वशय्यागृहमेत्य गाढं सुष्वाप। परेद्युः प्रभाते तस्मिन् गृहे बाह्यमिव आन्तरमपि तमो विननाश। आरामवापीकमलेष्विव तत्रापि लक्ष्मीरुल्ललास। सर्वे प्रमुदिता अभवन्। अचिरादेव माधवमिश्रः पुत्रस्य तया कन्यया साकं विवाहं निरवर्तयत्। धीमत्या विनीतया समर्थया तया तद् गृहमशोभततराम्।

# रामराज्यम् ॥

(उत्तमस्य राज्यस्योत्तमो राजा)

वि. वि. श्री.

(प्रथमाङ्कानुवृत्तिः)

[जनसङ्घो गायति—

रघुपति राघव राजा राम
पतित पावन सीता राम]

सङ्घस्थः कश्चित्— यदि त्वं रामं न दृष्टवानसि तर्हि चतुष्पथे त्वामवस्थाप्य कदाचिदप्यनवलोकितरामो विचित्रोऽयं जन्तुरिति सर्वस्मै लोकाय प्रकटनं युक्तम्।

रामः— नायमस्माकं गणनीयो विषयः। इदं तु पृच्छामि कः किल तस्य गीतस्य अर्थः, यद्यूयं सर्वे गायन्त आस्त?

सावित्री— अर्थः! अर्थः? किं नाम मन्त्रस्यार्थोऽस्ति?

रामः— किं नु तर्हि स मन्त्रः?

प्रजापतिः— कोऽन्यः? राममन्त्रः सः। तारकमन्त्रः। मन्त्राणां मन्त्रः।

रामः— अये! तथा नु? कियदाश्चर्यम्! स मन्त्र इति कथं ब्रूथ? किं तत्र प्रमाणम?

प्रजापतिः— सर्वलोकप्रसिद्धेऽर्थे प्रमाणापेक्षा कस्य भवति? किमिमं त्वं न जानासि?

रामः— न कश्चिन्मे तं मन्त्रमुपदिदेश।

प्रजापतिः— यद्यपि त्वं साक्षाद्राम एव भवसि तथापि अस्य मन्त्रस्य अधिगमस्ते श्रेयस्करो भवेत्। यन्नामसहस्रं भगवतः, तस्मादप्ययं उत्कृष्टः।

सीता— नूनं तथा भवितुमर्हति। (रामं प्रति) आवामपि इमं महामन्त्रं अधिगच्छेव। एते हि साधुजनाः तं अतीव बहुमानयन्ति।

रामः— किं नाम तथा श्रेयस्करोऽयं मन्त्रः? कथं च श्रेयस्करः?

प्रजापतिः— अहो अहो! इदमप्यहं ब्रूयाम्। यदिदमस्माकं रामराज्यं वर्तते, तस्य रामस्तथा न कारणं, यथा तस्य नाम स महामन्त्रः।

रामः—प्रिय भ्रातः! मा कोपं कार्षीः। रामराज्यं नाम तद्राज्यं यत्र रामो राजा। किं ततोऽधिकं किमपि तेन पदेनोच्यते?

प्रजापतिः— हं हो! मा स्म मूढो भवः। रामराज्यस्य वैदेशिकस्त्वं भासि। उत्तमस्य राज्ञः उत्तमं राज्य मिति तस्यार्थः।

रामः— किं नाम भूलोके एवंविधं किमप्यस्ति?

प्रजापतिः— किं नाम स्वर्गलोके एवंविधं किमप्यस्ति?

रामः— किं ब्रवीषि भ्रातः? रामराज्यमिति किं भूमिगतः स्वर्ग इत्यभिप्रेतम्?

प्रजापतिः— नैव नैव ततोऽधिकम्। .... ... अभ्यधिकम्।

सीता— कथमेतद् भवितुमर्हतीति त्वं मन्ये विवरिष्यसि।

प्रजापतिः— स्पष्टदृष्टं को विवरितुं शक्तः?

रामः— (सीतां पश्यन्) आः; पश्याम्यहम्।

प्रजापतिः— न। न त्वं पश्यसि। इतः परं द्रक्ष्यसि। रामसदृशो राजा नासीत्। रामराज्यसदृशं राज्यं नासीत्।

रामः— कथं, कुतः, एवं भाषसे ?

आनन्दः— (पौरः कश्चित्) किं क्वचित् तद् राज्यमासीत्, यत्र अवग्रहो नासीत्। धान्यसमृद्धिश्च सार्वकालिकी आसीत्।

सावित्री— अथवा तद्राज्यं यत्र न दुश्चरितमासीत्, न शोकः, न रोगः ?

प्रजापतिः— अथवा तद्राज्यं, यत्र महाराजः साधारणो मनुष्य इवासीत्, साधारणो मनुष्यो महाराज इव ?

सावित्री— तदस्तु। भ्रातः ! कच्चित् त्वश्रौषीः यत् अतीते भृगुवासरे पुरोहितस्य चतुर्वेदिनो दुहितुर्विवाहे वर्तमाने महाराजः झटित्यागत्य कुतो विवाहवार्ता मे न प्रेषितेति तमुपालभ्य वधूवरौ प्रीतिदानेन संभाव्य स्वप्रासादं गतः।

प्रजापतिः— तथा नु। वस्तुतो नाहं तदश्रृणवम्। परन्तु न तत्र विस्मय-पदं किञ्चित्।

आनन्दः— नास्माकमिदानीं विस्मयनीयेषु विस्मयो भवति। प्रतिदिनं प्रतिमुहूर्तं, सौजन्यमूलानि प्रेममूलानि च विस्मयनीयानि वृत्तानि श्रूयन्ते।

प्रजापतिः— किमन्यत् सम्भाव्यते भूमाववतीर्णे सर्वेश्वरे, यः प्रजाभि-रभ्यर्थितः राजभावमङ्गीचकार, न तु स्वयं तत्कामयमानः। राज्यपरि-पालनं स्वधर्म इति कृत्वा राजा बभूव न तु भोगलिप्सयाऽधिकार-तृष्णया वा।

आनन्दः— आं भ्रातः, साधूक्तं त्वया। पूर्वे राजानः राज्यं परिपालया-मासुः। वार्धके प्राप्ते अरण्यमाश्रित्य मुनयोऽभवन्। श्री राघवस्तु प्रथमं ब्रह्मचारी, ततो गृहस्थः, ततो वानप्रस्थः, अथ अन्ततः सन्यासस्थाने पट्टाभिषेकं प्राप्नोत्।

(रामः सीतां पश्यति। सीता स्मितं करोति।)

रामः— भूतार्थः ! कियदाश्चर्यम् !

प्रजापतिः— भ्रातः ! भगिनि ! यदि युवां वैदेशिकौ, इमां रात्रिं कुत्र स्वप्स्यथः ? कुत्र विश्रमिष्यथः ?

सीता— अत्र सन्ति अस्माकं बन्धवः। मा ते क्लेशो भूत्।

[सङ्घात् झटिति निर्गता काचन स्त्री रामं सीतां च पर्यायेण प्रसमीक्षते। अथ प्रजापतिना सह अपक्रम्य तस्मै किमपि वदति।]

प्रजापतिः— नाहं तत्प्रत्येमि।

स्त्री— तयोर्नेत्राणि सम्पश्य।

(रामः सीता च तदाकर्णयतः। अथ उभावपि तं देशं परित्यज्य तमसि अदृश्यौ भवतः)

प्रजापतिः— (सङ्घसमीपमेत्य) क्व तौ वैदेशिकौ?

अपरः कश्चित्— कौ तौ?

स्त्री— शपथं कर्तुं सज्जाऽस्मि, अस्मदीयौ सीतारामौ। अस्मत्प्रार्थनामङ्गीकृत्य अस्मभ्यं दर्शनं दातुं छन्नरूपौ आगताविति भाति।

प्रजापतिः— तदहं सन्दिहे।

स्त्री— पुरस्तात् स्थितं द्रष्टुं नेत्रे तव न स्तः। तयोर्नेत्रे स्तः, ये छादयितुमशक्ये।

प्रजापतिः— मन्ये यथार्थवादिनी त्वम्। अन्यथा कुतस्तौ झटिति दृष्टिगोचरादपक्रामतः?

स्त्री— अपक्रम्य सम्भाषमाणौ आवां तौ अद्राष्टाम्। परिवृत्य अवलोकमानौ तौ अहमद्राक्षम्। अतो मे निश्चयः।

प्रजापतिः— कियती अस्माकं भाग्यहानिः?

[तस्मिन् क्षणे सङ्घवर्ती कश्चित् पुनस्तद्गीतं गातुमारभते।
सर्वे तस्मिन् गीते नृत्ते च समन्विताः, रङ्गात् निष्क्रामन्ति।
गीतं दूरे दूरे श्रूयते। मन्दीभवति च।]

इति प्रथमोऽङ्कः।

# मुकुन्दमाला॥

कृष्णो रक्षतु नो जगत्त्रयगुरुः कृष्णं नमस्याम्यहं
कृष्णेनामरशत्रवो विनिहताः कृष्णाय तस्मै नमः।
कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं
कृष्णे तिष्ठति विश्वमेतदखिलं हे कृष्ण तुभ्यं नमः॥ ३३॥

पूर्वश्लोके स्तुत्या भगवन्तं अभिमुखीचकार। अथेदानीं स्वाभिलषितपरमपुरुषार्थोपायभूतं प्रपदनं तच्चरणारविन्दयोरनुतिष्ठति।

प्रपदनस्य प्रधानमङ्गं महाविश्वासः । अत्यन्तनीचमपि महापराधिनमपि मां महाकारुणिकः वात्सल्यजलधिः क्षमानिधिः भगवान् मदीयया अनया शरणागत्या प्रीतः अवश्यं रक्षिष्यतीति अचञ्चलो विश्वासो महाविश्वास इत्युच्यते । तमिमं महाविश्वासं व्यञ्जयन् प्रथमं सप्तविभक्तिवाक्यान्याह ।

जगतां त्रयस्य गुरुः पिता आचार्यश्च कृष्णः नः अस्मान् रक्षतु । पिता उत्पादकत्वात् । आचार्यः वेदादिविद्याप्रदानात् । एवं पिता आचार्यश्च सन् भगवान् पुत्रं शिष्यं च मां न परित्यजेत्, नियतं रक्षेत् । तस्मात् अहं कृष्णं नमस्यामि नमस्करिष्यामि । प्रपत्स्य इति यावत् ।

कृष्णेन अमरशत्रवः विबुधवैरिणः असुराः विनिहताः ध्वस्ताः । प्रपन्नानां इष्टप्रदः सः अनिष्टनिवारकोऽपि भवति । अस्माकं निःश्रेयसविरोधि सकलं पापं निवारयिष्यति । तस्मात् तस्मै कृष्णाय नमः । अनादिकालप्रवृत्तनिखिलदुरितविततिनिवृत्तिकारिणे तस्मा एव नमः कर्तव्यम् । अनिष्टनिवर्तकत्वात् स प्रपत्तव्य इत्युक्तं भवति ।

कृष्णादेव समुत्थितं जगदिदम् । इदं चेतनाचेतनरूपं जगत् सूक्ष्मचिदचिद्रूपात् स्वशरीरात् ससर्ज । तस्मात् सः स्वामी । कृत्स्नं जगत् तस्य शेषभूतम् । जगदन्तर्गतोऽहं तस्य दासः । दासस्य रक्षणं स्वामिनः प्राप्तम् । स मम स्वामी दासं मां कुतो न रक्षेत् ।

कृष्णे तिष्ठति विश्वमेतदखिलम् । निश्शेषमिदं जगत् कृष्णे तिष्ठति । कृष्णे आधारे आधेयतया स्थितम् । तं विना जगतः स्थितिरेव न भवेत् । सर्वस्य जगतः नित्यसंबन्धवान् भगवान् बन्धुरित्यर्थः । बन्धोः स्वसबन्धिरक्षणं धर्मः । अतो मां रक्षिष्यतीति महाविश्वासो व्यञ्जितः ।

अथ प्रपत्तिमनुतिष्ठति — हे कृष्ण ! तुभ्यं नम इति । मम सकलसंसारक्लेशनिवर्तनरूपं यद्रक्षणं तस्य भरं त्वय्यहं समर्पयामीत्यर्थः । एवं स्वरक्षाभरसमर्पणमेव प्रपदनमिति शरणागतिरिति चोच्यते । ऐन्द्रव्याकरणानुरोधेन सम्बोधनमन्ते निवेशितम् । विभक्तीनां क्रमेण निबन्धनमत्र शब्दचित्रम् । 'मामेकं शरणं व्रज' इति कृष्णेनैव स्वप्रपदनविधानात् तस्यैव नामात्र सर्वासु विभक्तिषु निवेशितम् ।

# शरणागतिः ॥

[ओट्टूर् उण्णि नम्बूदिरिप्पाड्]

उद्यद्भास्करबिम्बभास्वरतनुं मोहान्धकारान्तकम्
राकाचन्द्रनितान्तशान्तवदनं सन्तापसंकृन्तनम् ।
भक्तानां स्फुटमन्तरात्मनि सदा भान्तं पुरस्तात् क्वचित्
क्रीडन्तं निगमान्तमृग्यमवनीभाग्यं पुमांसं भजे ॥ १ ॥

सान्द्रस्निग्धविमुग्धवक्रचिकुरं बर्हावलीशेखरं
कारुण्योर्मिविघूर्णमाननयनं प्रेमस्मितार्द्राननम् ।
वंशीचुम्बितकोमलाधरपुटं नृत्यन्मनोज्ञभ्रुवम्
व्यत्यस्ताङ्घ्रिमनुस्मराम्युपनिषत्सारं गृहीताकृतिम् ॥ २ ॥

तारुण्ये गलिते धने क्षयमिते यत्ने मुहुर्विघ्निते
नष्टे सर्वपराक्रमे स्वजनसङ्घाते प्रतीपं गते ।
नैराश्येन मनस्यलं शिथिलिते जीवेऽन्धकारावृते
मर्त्यानां कृपणानुकम्पितमतिः श्री कृष्ण एका गतिः ॥ ३ ॥

चक्षुष्यन्तकदूतदर्शनवशाद्रौद्रत्वमापादिते
कण्ठे श्लेष्मनिरोधनाद् घुरघुराकोलाहलं कुर्वति ।
देहे च प्रतिरोमकूपमतुलां मर्मव्यथां विन्दति
श्री कृष्णस्सहसा मम स्मृतिपथं स्पष्टं समारोहतु ॥ ४ ॥

गात्रे जर्जरिते कफे प्रकुपिते कासे भृशं मूर्च्छिते
प्राणे कण्ठगते विमुह्यति मनस्युत्तानिते लोचने ।
मञ्जीरं मुरलीं च मञ्जु रणयन् केलीकटाक्षान् क्षिपन्
मन्दस्मेरमुखो ममाक्षिविषयः श्री कृष्ण आगच्छतु ॥ ५ ॥

१

भिक्षुः— राम राम दशरथराम
राम राम सीताराम

गृही— रे! याहि। श्व आगच्छ। अद्य भिक्षादानसौकर्यं नास्ति।

(भिक्षुर्याति)

२

भिक्षुः— कृष्ण कृष्ण पाहि कृष्ण
कृष्ण कृष्ण देव कृष्ण

गृही— रे! याहि। श्व आगच्छ। अद्य भिक्षादानसौकर्यं नास्ति।

भिक्षुः— कृष्ण कृष्ण माधव कृष्ण
कृष्ण कृष्ण मामव कृष्ण

गृही— किमरे! यहीति ब्रवीमि। पुनः स्थित्वा गायसि?

भिक्षुः— कृष्ण कृष्ण करुणां कृष्ण
कृष्ण कृष्ण कुरु मे कृष्ण

गृही— अरे भिक्षो! किं त्वं नापयास्यसि? तिष्ठ तावदासायम्। न भिक्षां लप्स्यसे। (भिक्षुर्याति)

३

भिक्षुः— पालय मां सुरनायक देव
पालय मां रघुनायक देव

गृही— रे! याहि। श्व आगच्छ। अद्य भिक्षादानसौकर्यं नास्ति।

भिक्षुः— पालय केशव माधव देव
पालय गोकुलपालक देव

गृही— किमरे! याहीति ब्रवीमि। पुनः स्थित्वा गायसि?

भिक्षुः— पालय रिपुजनमारक देव
पालय गिरिवरधारक देव

गृही— अरे भिक्षो! किं त्वं नापयास्यसि? तिष्ठ काममासायम्। न भिक्षां लप्स्यसे।

भिक्षुः— तिष्ठामि तव गृहद्वारे। ईश्वरो हि त्वम्। पुण्यं मे भविष्यति। निर्दय, क्षुद्र, लोभिन्, चिरं जीव, बद्धमुष्टिः धनं सञ्चिन्वन्। (याति)

Registered No M 2300.

Book XXXIII ॥ श्रीः ॥ No. 2

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

—— :o: ——

ये संस्कृतप्रियाः सन्तस्तेषां सद्मानिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३३] कलि ५०६१ विकारि - तुला [सं २

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

OCTOBER, 1959.

In case you have not received the previous number please inform the Editor or Publisher immediately.

पत्रिकामूल्यं निश्शेषं प्रेष्य उपकर्तव्यम् ।

Kindly help the poor journal by sending the arrears of your subcription

For the rate of subscription please see inside.

# UDYANA PATRIKA.


Annual Subscription Rs. Three only

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं त्रीणि रूप्याणि ।

२ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

३ वर्षमध्ये ग्राहकीभवतामपि कन्यासङ्चिकादिरेव पत्रिका प्रेष्येत ।

४ एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

५ प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

६ एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण सार्कं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

७ लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari, Panditaraja* D. T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.


---

## विषयाः ॥


1 भावनिष्यन्दः ।

2 अभ्यासः ।

3 मुकुन्दमाला ।

4 रामराज्यम् ।

5 गीतार्थदीपः । ३१३-३१६

6 गीतार्थसंग्रहः 17-20.

यन्निध्यानान्नयनकमले मीलितो भक्तिभाजां
देव्याः कामं कुवलयनिभे फुल्लतः चक्षुषी वा ।
आनन्दाब्धेर्भवति च सतामुत्तरङ्गस्य वृद्धिः
शम्भोश्चूडाव्रततिनियतं तं तमीशं नमामि ॥ ११ ॥

प्रालेयांशोः प्रतिदिनसुधासारवर्षोपचित्य-
वाविर्भूता विबुधतटिनी यत्कपर्दाशयेषु ।
स्वैरं खेलत्युपसृतवतामंहसामाशु हन्त्री
तस्मै भूयो नम इदमचिन्त्याय भूम्ने महिम्ने ॥ १२ ॥

तालोच्छ्रायत्वरितनिपतद्भीमकल्लोलमाला-
दुर्वाराहंकृतिरपि जटा यस्य गङ्गा प्रविश्य ।
क्षिप्तस्तोयाञ्जलिरिव महासैकते क्वापि लीना
नष्टे वर्त्मन्युपहतरयाऽवर्तत व्याकुलोर्मिः ॥ १३ ॥

राजीवाक्षद्रुहिणसुरराण्मुख्यगीर्वाणबृन्दैः
स्वैरापाङ्गभ्रमणपदवी मृग्यते यस्य कृच्छ्रात् ।
देवोऽस्माकं स किल कुलकूटस्थ इत्यस्तशङ्कं
तत्पादाब्जे विनिहितभरा दुःखपारं प्रयामः ॥ १४ ॥

पूता आपः शिरसि विनिकीर्याद्रिनाथः पुरा त्वां
कन्यादानक्षममकृत किं छन्दमन्वीय पुत्र्याः ।
नो चेदेषा कथमिव सरित् सानुमत्सार्वभौम-
प्राग्भारेषु प्रथितविहतिः प्रापि कापालिकेन ॥ १५ ॥

कल्लोलालीकबलितमला निर्मला मौलिमाला
लीलोत्तंसो विकलकुमुदोल्लासकेलीविलोलः ।
भूषाः प्रोद्यन्मुकुटमणिभारञ्जिताशावकाशाः
शश्वत्प्रावृड्घनमलिनितं चाम्बरं स्वामिनो मे ॥ १६ ॥

गङ्गा मूर्धन्यहिपरिगता तत्फणामूलवासी
चन्द्रः कान्तापि च तव पिनद्धोपवीतोरगेण ।
प्रायः प्रेम्णो यदि शिव भवेदीदृशस्ते विपाकः
त्वत्पादाब्जप्रपदनपरास्त्वत्प्रसादाद् बिभीमः ॥ १७ ॥

आविर्भूते निटिलनयनात् क्रोधवह्निस्फुलिङ्गे
भस्मप्रायं स्मरवपुरभूत् तस्य कान्ता मुमोह ।
स्वैः सौभाग्यैर्नगपतिसुता विप्रलब्धा व्यषीदद्
विच्छायोऽभूद्विधुरपि भिया द्राग्विलिल्ये वसन्तः ॥ १८ ॥

उग्रः शूली विषमनयनो भूतनाथः कपाली
स्थाणू रुद्रः पशुपतिरहो दूरदृष्ट्या प्रभुर्नः ।
श्रीकण्ठोऽसौ त्रिपुरदमनः शङ्करः कालकालः
साम्बः शर्वो विलसति कलेशावतंसो विमर्शे ॥ १९ ॥

कल्पस्रोतोविरतिविधुतैःखेचरैरुत्पतद्भिः
ज्योतिर्लेखाङ्कितसरणिभिर्विष्वगाविश्यमानः ।
नृत्तोद्धूतप्रसृमरजगत्स्तोमभस्मानुविद्धो
दीव्यत्यन्ते स्वसुखभरितो देवदेव त्वमेकः ॥ २० ॥

पर्याश्लिष्टो मलयजधिया पन्नगैरङ्गमङ्गं
जाटैर्जूटैर्द्विजपतिकुलायैरिवोन्नद्धमूर्धा ।
भद्रं कुर्याद्भवपरितपत्सर्वलोकैकसेव्यः
शाखी कोऽपि त्रिजगदवधिग्राहिमूलाग्रमानः ॥ २१ ॥

कान्तामन्दस्मितधवलिमश्यामलीभूतचन्द्रं
तद्भ्रूलास्यैरधरितनदीवीचिमालाविलासम् ।
तस्या लोलेक्षणपरिभवग्रस्तहस्तस्थितैणं
योगिध्येयं मनसि मम तद्दैवतं सन्निधत्ताम् ॥ २२ ॥

अश्लक्ष्णत्वात्सपदि शिथिलं कृत्तिसंव्यानमंसे
संग्रथ्नन्त्या मुहुरगजया स्नेहदृष्ट्या निपीतः ।
अव्यादस्मान्मुदितगणराण्मत्ततालक्रमोद्य-
द्दोपाक्षेपभ्रुकुटिविकटस्ताण्डवे नीलकण्ठः ॥ २३ ॥

द्वे ते भार्ये सुहृदिति जहारार्थराड् भूतिमारात्
भूताविष्टं गृहमपहृतं चाम्बरं तैर्दिगीशैः ।
भैक्ष्यं वृत्तिः किमपि चरितैः सङ्गतं दूषणं ते
तन्निर्विण्णो गरलमगिलस्त्वं ततो विस्मयः कः ॥ २४ ॥

ऐश्वर्यस्थितिरपि वहन् कर्परं भिक्षमाणः
चित्रं वेषं फणिगणचिताभस्मकौपीनकल्पम् ।
बिभ्रत्प्रेक्षाणकमिव विनोदाय सन्दर्शन्नयः
स्वामिन्नुन्मत्त इव रमसे स्वामिनो हि स्वतन्त्राः ॥ २५ ॥

भस्मालेपः प्रविततजटः कृत्तिवासाः कपाली
शम्भो भिक्षामटसि बत खल्वर्थिनो वञ्चयिष्यन् ।
त्वद्वाचैव श्रुतिपथजुषा त्वद्विभूतीरनन्ताः
किं जानीमो न चिरमुषितास्त्वत्पदाम्भोज एव ॥ २६ ॥

तुल्यं धत्से शशिविषमुचौ लालयन्नुत्तमाङ्गे
कल्याणोर्वीभृति तव कपालेऽपि दृष्टिः समाना ।
कैलासं वा पितृवनभुवं गाहसे निर्विशेषं
निःसङ्गानां विहरसि धुरि त्वं किलादर्शभूतः ॥ २७ ॥

क्ष्माभृद्गोत्रप्रवरदुहितेत्युद्वहस्यद्रिकन्यां
व्योम्नः प्राप्तेत्यपि शिरसि तां लालयस्यभ्रसिन्धुम् ।
सख्यं वाञ्छस्यपि धनपतेराश्रयस्यद्रिशृङ्गं
शश्वत्किं नोन्नतिमभिलषत्युन्नतोऽपि प्रकृत्या ॥ २८ ॥

यच्चूडाब्जप्रसृमरमरन्दोपजीवी द्युलोकः
सर्वामुर्वीं वहति शिरसा नूपुरं यस्य नित्यम् ।
आर्द्रं वासो विततमभितो यस्य दिग्भित्तिकीले-
ष्वस्योदग्रः क इव महिमा गोचरेऽपि प्रवाचाम् ॥ २९ ॥

यस्य स्वैरोच्छ्वसितमखिलं वेदसन्दोहमाहुः
शाब्दं वा यड्डमरुनिनदोपज्ञमिच्छन्ति शास्त्रम् ।
यस्मात्प्रापुर्नटपरिबृढा नाट्यविद्याप्रकाशं
सर्वज्ञोऽसौ गुरुरपि गुरोर्गोचरः कस्य वाचाम् ॥ ३० ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधः खेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु ३३] कलि ५०६१ विकारि - तुला [सं २


## ॥ अभ्यासः ॥

यत् किमपि कर्म पटुभिः क्रियमाणं समीचीनं भवति । अपटुभिः क्रियमाणं असमीचीनं भवति । तस्मात् यत् कर्म कर्तुमिष्यते तत्र प्रथमं पाटवं सम्पादनीयम् ।

पटुत्वसम्पत्तेः क उपायः ? अभ्यासः । अभ्यासो नाम पुनः पुनः करणम् ।

द्विचक्रमारुह्य गतागतं कर्तुं कश्चित् इच्छति । मूल्यं दत्वा सद्यः अभिनवं रमणीयं द्विचक्रं क्रीणाति । अथवा भाटकेन एकं क्रीणाति । स किं तदानीमेव तदारुह्य गन्तुं शक्नोति ? नैव । तदारोहणं शिक्षितुं प्रवर्तते । कति पतनानि ! कति जानुव्रणाः ! तत् सर्वमगणयित्वा पुनः पुनः यत्नं करोति ।

आदौ हस्ताभ्यामालम्ब्य द्विचक्रस्य धारणमेव दुष्करं भवति। पुनः पुनर्यतमानस्य क्रमेण धारणे आरोहणे गमने च पाटवं जायते ।

अनेन निदर्शनेन सर्वमन्यद् ज्ञातव्यम्। यदि कयाचन भाषया भाषणं लेखनं वा कर्तुमिष्यते, तर्हि तत्र अभ्यासेन पटुत्वं सम्पादनीयम् ।

पुनः पुनः भाषणं कर्तव्यम् । पुनः पुनः लेखनं कर्तव्यम् । यथा यथा अभ्यासोऽधिको भवति, तथा तथा पटुता अधिका भवति ।

अस्मिन् काले संस्कृतभाषणे लेखने च अभ्यासोऽत्यल्पः । तेन महान्तः पण्डिता अपिसंस्कृतव्यवहारं रमणीयं कर्तुं न क्षमन्ते । अनल्पं क्लेशमनुभवन्ति ।

संस्कृताध्ययने प्रवृत्तैः आरम्भ एव शास्त्रग्रन्थो न ग्राह्यः । लघुतम, लघुतर, लघु, कठिन, कठिनतर, कठिनतमक्रमेण गद्य-पद्यमिश्ररूपाणि बहूनि काव्यान्यध्येयानि ।

एतदध्ययनकाल एव भाषणलेखनाभ्यासः कर्तव्यः । अस्मिन् विषये सम्प्रति सर्वत्र अत्यन्तमुपेक्षा क्रियते ।

येषां लेखनभाषणयोः अभ्यासविरहात् पाटवं न सम्पन्नं तेषां भाषाव्युत्पत्तिः नूनं असमग्रैव भवेत् । तथा सति शास्त्रपाण्डित्यमपि न सम्पूर्णमित्येव वक्तव्यम् ।

तस्मात् संस्कृताध्यायिभिः सर्वैः अस्यां भाषायां लेखन-भाषणाभ्यासकरणे श्रद्धा कार्या ।

---

# मुकुन्दमाला ॥

---

तत्त्वं प्रसीद भगवन् कुरु मय्यनाथे
विष्णो ! कृपां परमकारुणिकः किल त्वम् ।
संसारसागरनिमग्नमनन्त दीन-
मुद्धर्तुमर्हसि हरे ! पुरुषोत्तमोऽसि ॥ ३४ ॥

प्रपत्त्यनुष्ठाने द्वावंशौ स्तः। एकं मन्त्रात्मकशब्दोच्चारणम्। अपरं तदर्थानुसन्धानमिति। अत्र आद्यं 'हे कृष्ण तुभ्यं नमः' इति पूर्वं वृत्तम्। अन्त्यमस्मिन् श्लोके निबध्यते।

तत् तस्मात्। यस्मादहं शोकाकुलः त्वामुपसन्नश्च तस्मादित्यर्थः।

हे भगवन्! त्वं प्रसीद। इयन्तं कालं मया कृतैरनन्तैरपचारैः जातो यः क्रोधः तेन कलुषं ते मनः। तादृशकालुष्यरहितमना भव। कृतपूर्वान् सर्वानपराधान् क्षमस्वेति भावः।

हे विष्णो! अनाथे रक्षकान्तररहिते। मयि। कृपां अपेक्षित-फलप्रदानेच्छां कुरु।

विविधानन्तापराधकारिणि त्वयि कथं कृपां कुर्यामिति चेत् तत्राह। परमकारुणिकः किल त्वम्। महापराधिष्वपि कृपां करोमीति शास्त्रे लोके च प्रसिद्धो हि त्वम्।

सकृदेव प्रपन्नाय तवास्मीति च याचते।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम॥
दोषो यद्यपि तस्य स्यात्सतामेतदगर्हितम्। इति।

अन्ये सर्वे कारुणिकाः गुणदोषपरामर्शिनः अवरा अवमाश्च कारुणिका भवन्ति। त्वमेकः परमः कारुणिकः।

अपेक्षितं किमिति चेदाह। 'तृष्णा तोये' इत्यादिना पूर्वं वर्णिते संसारसागरे निमग्नं दीनं तदुत्तरणसामर्थ्यरहितं अत एव अत्यन्तशोका-कुलं मां हे अनन्त उद्धर्तुमर्हसि उद्धर। इदं मदपेक्षितम्।

इयं प्रार्थना कथं मयि क्रियते। नान्यस्मिन् देवे, इति भगवता पृष्टः प्रतिवक्ति। हे हरे! त्वं पुरुषोत्तमोऽसि। पुरुषेषु त्वमुत्तमः। इतरे पुरुषाः त्वदपेक्षया क्षीणप्रायाः। मां संसारसागरादुद्धर्तुमशक्ताः। त्वमेक-स्तत्र शक्तः। अतः त्वयि प्रार्थना क्रियते।

स्वदैन्यातिशयस्य भगवद्गुणातिशयस्य चानुसन्धानमहिम्ना विद्रुत-चित्तः वाक्ये वाक्ये सम्बोधनं प्रयुङ्क्ते— भगवन्, विष्णो, अनन्त, हरे इति। शक्तिज्ञानबलैश्वर्यवीर्यतेजसां निधित्वात् भगवान्। सर्वव्यापि-त्वात् विष्णुः। देशकालवस्तुपरिच्छेदरहितत्वात् अनन्तः। सर्वपापहर-त्वात् हरिः।

इत्थं कर्मयोगादिष्वशक्तस्य मम संसारतरणरूपमोक्षोत्पादनभरः भगवत एव न ममेति "कृष्णाय तुभ्यं नमः" इत्यस्यार्थोऽत्र अनुसंहितः।

# रामराज्यम् ॥

(उत्तमस्य राज्यस्योत्तमो राजा)

वि. वि. श्री.

## द्वितीयोऽङ्कः । प्रथमं प्रेक्षणकम् ।

देशः— रामस्यान्तःपुरम् ।
कालः— प्रभातम् ।

रामः— प्रिये सीते ! अपि नाम तं स्वप्नं अभ्यूहितुं शक्नोषि, यो मया अतीतायां निशायां दृष्टः ?

सीता— प्रश्न एवायं व्यञ्जयति तदभ्यूहनं दुष्करमिति । का मे तत्र शक्तिः ?

रामः— यतस्व । पश्येम तावत् ।

सीता— (क्षणं ध्यात्वा साहसं) यदि आवयोर्विवाहः स्वप्ने दृष्टः स्यात् तन्मे प्रियं भवेत् । वर्षगणात् पूर्वं वृत्तोऽपि सः ह्य एव वृत्त इव भाति ।

रामः— सत्यं सत्यं तथा । आवयोरुभयोर्जीविते महत्तमा किल सा प्रवृत्तिः ।

सीता— प्रभो ! यदि ते मत्परिणयदौर्भाग्यं, तानि चतुर्दश वर्षाणि वनवासदुःखं च नाभविष्यच्चेत्, किं जातमभविष्यत् ?

रामः— किमन्यत् ? यद्यहं त्वां परिणीतवान् नाभविष्यं, अहं न रामोऽभविष्यम्, त्वं च न सीताऽभविष्यः । ततश्च स सीतारामो नाभविष्यत् यं अयोध्यावीथीषु अतीतायां रात्रौ प्रमुदिताः पौराः वर्गशो जेगीयन्ते स्म ।

सीता— तत्सर्वं दैवायत्तं मन्ये ।

रामः— न । प्रिये ! इदं मे भाति । परस्परस्य कृते आवयोः सृष्टिः । दैवमपीदं विघटयितुं न शक्नोति ।

सीता— किमन्यत् ? कथमन्यथा । यतस्त्वं मां उदूढवान् ततो मद्दौर्भाग्यं सर्वं त्वया विभक्तव्यमासीत् ।

रामः— तथा नु । कथं विपर्यस्य न भणसि यदि त्वं इमं दुर्भगं रामं न परिणीतवत्यासीः, अतिसम्पन्ना अननुभूतदुःखलवलेशा कस्यचिन्महाराजस्य दयिता महिषी भवेः ।

४७७　**अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।**
**अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥**

अथ भगवति चित्तसमाधानोपायमुपदिशति—हे धनञ्जय ! 'अथ' इति प्रश्नार्थः यद्यर्थविश्रान्तो वा, मयि-वासुदेवे, चित्तं- मनः, स्थिरं-निश्चलं यथा तथा, समाधातुं- स्थापयितुं, न शक्नोषि- शक्तो न स्याश्चेत्, ततः- साक्षाच्चित्तसमाधनाशक्तत्वात्, अभ्यासयोगेन—आलम्बने पुनः पुनस्स्थापनमभ्यासः, स एव योगः- चित्तनिरोधोपायः तेन मां आप्तुं प्राप्तुं, इच्छ— प्रार्थयस्व, अभ्यासाख्योपायेन स्थिरचित्तसमाधानं लब्ध्वा मां प्राप्तुमिच्छ इति यावत् ।

அர்ஜுனா ! சஞ்சலமான மனதை என் பக்கல் ஸ்திரமாக வைப்பதற்கு உனக்கு சக்தியிராவிடில் அப்யாஸமாகிற உபாயத்தினால் மனதை ஸ்திரமாகச் செய்து என்னை அடைய விரும்புவாய். அப்யாஸமாவது— தனது லக்ஷ்யவஸ்துவிலிருந்து விலகிய மனதை மறுபடியும் மறுபடியும் அதே லக்ஷ்யத்தில் ஊன்றவைப்பது. அதனால் நாளடைவில் மன உறுதி ஏற்பட்டு என்னை அடைவாய். 9

४७८　**अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।**
**मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि ॥**

अभ्यासोपायमुपदिशति — पूर्वश्लोकात् 'अथ' शब्दोऽत्रानुवर्तते, अभ्यासेऽपि एवंविधस्मृत्यभ्यासेऽपि, असमर्थः असि अशक्तश्चेत्, मत्कर्मपरमः- मम कर्माणि- मदसाधारणानि आलयनिर्माणोद्यानकरणप्रदीपारोपणमार्जनोपलेपनपुष्पाहरणपूजाप्रवर्तननामसङ्कीर्तनप्रदक्षिणस्तुतिनमस्कारादीनि, तानि परमाणि- प्रधानानि यस्य सः, भव- तान्यत्यर्थप्रियत्वेनाचरेति यावत् । मदर्थम्- मामेवोद्दिश्य, कर्माणि- आलयनिर्माणादीनि पूर्वोक्तानि, कुर्वन्नपि, सिद्धिम्- अचिरादभ्यासयोगपूर्विकां मयि स्थिरां चित्तस्थितिं लब्ध्वा मत्प्राप्तिरूपां सिद्धिम्, अवाप्स्यसि- प्राप्स्यसि ।

வெகுகாலமாகப் பழகிய வ்யாபாரங்களிலேயே ஸம்ஸ்காரம் பெற்றதாயிற்றே மனது. அது பகவான் பக்கலிலேயே அப்யாஸம் செய்வதற்குமியலாததே என்று அசக்தனாக உன்னை எண்ணுவாயாகில் அப்யாஸத்திற்குமுபாயம் சிலவுண்டு. அவை

யாவன — எனக்காகவே செய்யப்படும் கைங்கர்யங்கள். ஆலய நிர்மாணம், மாலாகரணம், தீபாரோபணம், நாமஸங்கீர்த்தனம் முதலியனவே அவை. அவற்றை ப்ரீதியோடு செய்துவருவாயாக. சீக்கிரத்தில் மனது அப்யாஸத்திற்குப் பக்வமாகும். அப்யாஸத்தினால் ஸ்திரமான மனநிலை ஏற்படும். அதனால் என்னை அடைவாய். 10

४७९ अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ ११ ॥

स्वार्थेष्वेव कर्मसु निबद्धचित्तस्य कथं भगवदसाधारणकैङ्कर्येषु प्रवृत्तिरिति आशयमुन्नीय तदुपायपरंपराकाष्ठाभूतं कर्मयोगं प्रत्यभिज्ञापयति— मद्योगं— मद्विषयं भक्तियोगं, आश्रित्य— उपायत्वेन स्वीकृत्य, एतदपि-भक्तियोगाङ्कुरभूतं पूर्वोक्तं आलयनिर्माणादिकर्मापि, कर्तुम्— अनुष्ठातुम्, अथ— अशक्तः असि— असमर्थो भवसि यदि, ततः— असामर्थ्यादेव हेतोः, यतात्मवान्— नियतमनस्कस्सन्, सर्वकर्मफलत्यागं— ज्ञानयोगाङ्कुरभूतस्य सर्वस्यापि कर्मयोगस्य देवार्चनतपस्तीर्थयज्ञदानादेः फलाभिसन्धिसन्यासम्, कुरु । मद्योगमाश्रित्य तदङ्कुरे मदसाधारणकर्मणि असमर्थश्चेत् जीवात्मयोगमाश्रित्य तदङ्कुरे कर्मयोगे प्रवर्तस्वेति वाक्यार्थः ।

பக்தியோகத்தை அநுஷ்டிக்கவேண்டிய நிலையைப் பெறுதற்கு அதன் கீழ் நிலையான ஆலயநிர்மாணம் முதலியவற்றைச் செய்யும் நிலையையாவது பெறவேண்டும். அதற்கும் கீழ்ப்பட்டுள்ள பக்தியோகநிலையொன்றுமில்லை. அதற்கும் நீ அஸமர்த்தனாகில் பக்தியோகத்திற்கு ஸாதநமாக ஜ்ஞாநயோகத்தை அநுஷ்டித்தல் வேண்டும். அதற்காகப் பலன்களில் பற்றுதலில்லாமல் கர்மயோகத்தை அநுஷ்டானம் செய்வாய். அதனால் மனத்தூய்மை பெற்று ஆத்மஸாக்ஷாத்காரம் ஏற்படும். பிறகு பக்தியோகம் அநுஷ்டிக்கலாம். 11

४८० श्रेयो हि ज्ञानमभ्यासात् ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥ १२ ॥

अथाव्यवहितोपायानधिकारनिमित्तखेदनिवृत्त्यर्थं व्यवहितानेवोपायान् यथाधिकारं सौकर्यातिशयेन प्रशंसन्नुक्तमुपपादयति— अभ्या-

सात्– अत्यर्थप्रीतिविरहितं कर्कशरूपं परमात्मस्मृत्यभ्यासमपेक्ष्य; ज्ञानम्– स्वात्मावलोकनम्, श्रेयो हि– आत्महितत्वे विशिष्यते किल. 'व्यवहितोपायस्यापि सौकर्यातिशयलक्षणमत्र हितत्वम्' ज्ञानात्– अनिष्पन्नरूपमात्मसाक्षात्कारमपेक्ष्य, ध्यानम्– आत्मसाक्षात्कारहेतुभूतं आत्मध्यानम् विशिष्यते– आत्महितत्वे श्रेयः, ध्यानात्– अनिष्पन्नरूपमुक्तमात्मध्यानमपेक्ष्य, कर्मफलत्यागः– उक्तध्यानहेतुभूतः कर्मयोगफलत्यागः, फलत्यागेनानुष्ठितं कर्मेति यावत्, विशिष्यते– श्रेयः, त्यागात्– कर्मफलाभिसन्धिपरित्यागाद्धेतोः, अनन्तरं अव्यवधानेन, शान्तिः–मनसो नियमनं [भवति] "शान्ते मनसि आत्मध्यानं सम्पत्स्यते; ध्यानाच्च तदापरोक्ष्यम्; तदापरोक्ष्यात् परा भक्तिरिति भक्तियोगाभ्यासाशक्तस्यात्मनिष्ठैव श्रेयसी; आत्मनिष्ठस्याप्यशान्तमनसो निष्ठाप्राप्तयेऽन्तर्गतात्मज्ञानानभिसंहितफलकर्मनिष्ठैव श्रेयसीत्यर्थः।"

பக்தியோகத்தை அநுஷ்டிப்பதற்கு முன் அதை அடிக்கடி அப்யாஸம் செய்தல் வேண்டும். அது ப்ரீதிரூபமாய் அமையாவிடில் அதற்கு ஸாதநமான ஆத்மஸாக்ஷாத்காரம் சிறந்தது. அதுவும் ஸித்தியாவிடில் அதற்கு வேண்டிய ஜ்ஞாநயோகம் மேலானது. ஜ்ஞாநயோகமும் அநுஷ்டிக்க இயலாமையில் பயனைக் கோலாமல் கர்மயோகத்தை அநுஷ்டித்தல் வேண்டும். அவ்வாறு கர்மாவை அநுஷ்டித்தலால் மனம் சாந்தியை பெறும். அதனால் ஆத்மத்யாநமுண்டாகும். பிறகு ஆத்மஸாக்ஷாத்காரம் வரும். அதற்குப் பிறகு பக்தியோகம் கிட்டும். 12

४८१ अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारस्समदुःखसुखः क्षमी ॥ १३ ॥

४८२ सन्तुष्टस्सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तस्स मे प्रियः ॥ १४ ॥

एवं 'भक्तेश्श्रैष्ठ्यमुपायोक्तिरशक्तस्यात्मनिष्ठता' इत्येतावदुक्तम् । अथ सप्तभिः श्लोकैरात्मनिष्ठाप्रकाराः इतिकर्तव्यतारूपाः कर्मयोगाद्यपेक्षिताः उपादेयगुणा उच्यन्ते– सर्वभूतानाम्– विद्विषतामुपकुर्वतामपि सर्वेषां प्राणिनाम्, अद्वेष्टा– अविरोधी, मैत्रः– मैत्र मित्रभावः, मित्रतया वर्तत इति मैत्रः सर्वेषु भूतेषु मैत्रीं मतिं कुर्वन्, करुण एव च– करुणा कृपा, तद्वान्

करुणः, निर्ममः– देहेन्द्रियेषु तत्संबन्धिषु च निर्गतममकारः, निरहङ्कारः– ममत्वाभिमानहेतुभूताहंबुद्धिरहितः, समदुःखसुखः– समे– द्वेषरागयोः अप्रवर्तके, दुःखसुखे यस्य सः, क्षमी- क्षमावान्, आक्रुष्टः अभिहतो वा विकाररहितः,

सन्तुष्टः– यदृच्छोपनतेन येन केनापि देहधारणद्रव्येणोत्पन्नालंप्रत्ययः, सततं योगी– सर्वदा प्रकृतिवियुक्तात्मानुसन्धानपरः, यतात्मा– अनात्मचिन्तनान्निवृत्तमनाः, दृढनिश्चयः–अध्यात्मशास्त्रोदितेष्वर्थेषु स्थिराध्यवसायः, मयि– भगवति वासुदेवे, अर्पितमनोबुद्धिः–अर्पिते मनोबुद्धी यस्य सः, 'आराध्यत्वेन चिन्तनमत्र मनसोऽर्पणम्; फलप्रदत्वाध्यवसायो बुद्ध्यर्पणम्, यः मद्भक्तः– एवंभूतः कर्मयोगेन मां भजमानो यः, सः, मे प्रियः– प्रीतिविषयः, प्रीतोऽहं तदिष्टं ददामीति भावः ।

யாவனொருவன் தனக்கு அபகாரம் செய்யுமவர் பக்கலிலும் த்வேஷமற்று, அன்பும் கருணையுமுடையனாய், யான் எனது என்கிற அபிமானத்தையகற்றி ஸுகதுக்கங்களினால் ஸந்தோஷமும் த்வேஷமுமில்லாது பொறுமையுடையனாய், தேஹயாத்ரைக்கு நேர்ந்தமட்டில் த்ருப்தி பெற்று, ஆத்மாநுஸந்தாநமொன்றிலேயே ஈடுபட்டு, மற்றவற்றிலிருந்து மனதை அடக்கி வேதாந்தசாஸ்த்ரத்தில் சொல்லிய பொருளெல்லாம் உண்மையென்கிற த்ருடபுத்தியுடையனாய், கர்மயோகத்தினால் என்னை ஆராதனம் செய்கின்றானோ அவன் என்னுடைய அன்பிற்கு இலக்கானவன். 13-14

४८३ यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यस्स च मे प्रियः ॥ १५ ॥

निर्ममत्वादिफलभूतं लोकोद्वेगकरकर्मत्यागरूपं गुणं विदधत् तत्फलयोगं च दर्शयति— लोकः– जनः, यस्मात् निमित्तभूतात् कर्मनिष्ठात् पुरुषात्, नोद्विजते– सन्तापं न गच्छति, यश्च– लोकात्, नोद्विजते- न संक्षुभ्यति, यश्च, हर्षामर्षभयोद्वेगैः– तं तं पुरुषमुद्दिश्य प्रीत्या असहिष्णुतया त्रासेन जुगुप्सया च, मुक्तः यः स च मे प्रियः, पूर्वश्लोकोक्तमैत्रत्वकरुणत्वादिगुणगणाभावेऽपि लोकोद्वेककरकर्मनिवृत्तिमात्रेणापि प्रीतो भवामीति भावः ।

*Karma* means action. There are several actions enjoined in *Sastras*, Veda and others, such as *Darsa Purnamasa*, *Jyotistoma*, and *Kshamavati*. These are divided into three kinds, *kamya* (fructiferous), *nitya* (compulsory), and *naimittika* (contingent). *Kamya* is that which yields some desired result such as *svraga*, wealth, child, strength. *Nitya* is that which, if not done, will result in some demerit, but which, when performed, will help remove sins already committed. The first two of the sacrifices mentioned above *Darsa Purnamasa* and *Jyotistoma*, have got both these aspects, *kamya* and *nitya*. *Naimittika* is that which is to be performed on some occasion specified by *sastras*. For example, *Kshamavati isti* is a sacrifice to be performed when there happens a fire-accident to one's house. This, like *nitya*, helps in removing some of one's sins. Besides these major results, there are many minor ones, *e.g.*, long and pleasant life, obtainable from these sacrifices. When one performs these sacrifices, completely renouncing their results, the fruits they yield, major as well as minor, one raises them to the level of *yoga*. He who performs them so is a *karmayogin*, what he performs being *karmayoga*. The same ordinary actions, which if done with an intention to achieve their respective results would yield them and consequently strengthen and prolong bondage *(samsara)* of the performer, assume, when done with utter disregard and renunciation of those results, the magnanimous character of *yoga* and become the means of freedom from bondage or immortality. These actions, which are divergent in themselves and, are enjoined as means of divergent inferior results, have, as such obviously nothing to do with each other. But when they are done by the *yogin* who cares for nothing but liberation, they combine and become one, as it were, as the means of the realisation of the end the *yogin* has in mind.

This *Karma-yoga*, to be perfect and effective, requires a thorough and definite and full knowledge of the nature

of the soul (*Sankhya* already explained), on the part of the yogin. This is another factor of *karma-yoga* distinguishing it from ordinary *karma*.

It was said that *karma-yoga* will lead to freedom from bondage, to immortality. But this is not its immediate result. It makes the practiser fit for a higher *yoga*, which is called *jnanayoga*, or *sthita-prajnata* and which is mentioned in the stanza as *sthita-dhi*. This means meditation, *upasana*, on the pure soul, culminating in its full extatic experience.

There are four stages of this *jnana-yoga*. The first is that in which the *yogin* makes strenuous attempts to control his senses. He tries hard to detract and detach his sense-organs from their respective objects of enjoyment, to contact which they have a natural and inborn tendency. In this stage the *yogin* continues to be full of desires but earnestly and seriously endeavours to suppress and get rid of them.

The second is that in which the *yogin*, finding that his mind is not yet completely controlled and so it is apt to drive the sense-organs towards their usual course of experiencing pleasurable objects and itself incapable of concentration on the soul, tries harder than before to cleanse it of all such desires as may still linger there, adopting an attitude of indifference and disinclination towards the sense-objects.

The third is that in which mind, though free from all desires, still, due to its tendency or inclination to enjoy pleasurable objects, effected by long continued contact with and experience of them, though now latent and remaining only in a sub-conscious state, would prevent the happening of its concentration on the soul. The *yogin* will try in this stage to completely kill that tendency (*vasana*) of mind by frequent and constant thoughts of the soul, the nature of which is indescribably blissful and wonderful.

The fourth and last and ultimate stage is that in which there is absoulute detachment from all else than the soul. The *yogin* in this stage has no interest whatsoever in any thing in this or the furture world except the soul.

In the first stage the *yogin* does enjoy the pleasurable things but tries hard to get detached from them. In the second he finds himself experiencing and enjoying them but not with so much attachment as before. In the third there is absolute detachment, but the enjoyables appear to be as such. In the fourth they cease to be enjoyables so far as the *yogin* is concerned. These four stages are called *yatamana*, *vyatireka*, *ekendriya* and *vasikara*, respectively.

When, in the practice of the *jnana-yoga,* this fourth stage is reached the *yogin* finds no difficulty in concentrating on his self, which is the soul indwelling the body which he calls his, and realises the object of the *yoga*, the perceptual experience of the soul—*atmavalokana.*

It is very difficult to attain to this *yoga*. A practiser has to begin this, first avoiding all pleasurable things, sense-objects. He would sit in seclusion in a place where there would be present nothing that would disturb or detract him. He would close his eyes and cover his ears and take every care too see that nothing attractive remains within the range or reach of these organs. When however he sets to start meditation his sense-organs, being ever used to contact their respective objects, are certain to bring thoughts of them, which persisting would provoke desire which, in its turn, growing stronger and stronger, would result, in a consequential order, in impatience, anger, indiscretion, forgetfulness in respect of his attempt to control his sense-organs, and utter detriment to his resolve regarding the *yoga* practice. Unless one has achieved an absolute control over one's sense-organs one can never hope of realising the object of the *yoga*, the soul-experience, and

RIYA ... LIBRARY

reversely, unless one has achieved the soul-experience one can never hope of having complete control over one's sense-organs. There is thus a dilemma confronting one that wants to practise *jnana-yoga*. It is *Karma-yoga* which can help escape from it. This *yoga* which is, as has been already explained, action done with absolute unconcern and renunciation of all its results and invigorated with sound soul-knowledge and besides, elevated, as will be shown later on, to the grand form of worship of *Paramatman*, will please Him, whose resultant Grace will remove all such sins of the *yogin* as keep his mind full of filth of the form of the two lower qualities, *rajas* and *tamas*. When his mind is thus purified, all his desires and hatred, his likes and dislikes, will go, and consequently his sense-organs, losing their inclination and tendency to contact their objects, become completely controlled, whereupon there will be nothing to thwart his *jnana-yoga* which therefore he will be entirely free to take up and successfully practise. *Karma-yoga*, His grace, removal of sins, purity of mind,destruction of desire and hatred,control of sense-organs *jnana-yoga* (concentration and meditation on the pure soul); these seven occur gradually. It has been indicated that *jnana-yoga*, when mature, yields the ecstatically blissful soul-experience.

All this was taught to Arjuna by Krishna, Yamunacharya tells us in this stanza, in order to remove his misconception about the war. The first *adhyaya* is concerned with Arjuna's distress and the second with what Krishna taught to him with a view to clear his misunderstanding.

3. What he heard from Krishna about the soul was very interesting and attractive and fascinating to Arjuna. He thought why he should not immediately take up *jnana yoga* directly yielding soul-experience, which is more important than *karma-yoga* which is only the stepping stone to attain to *jnana-yoga*. He further thought that the two

Registered No M 2300.

Book XXXIII || श्रीः || No. 3

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

:o:

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३३] कलि ५०६१ विकारि - वृश्चिक [सं ३

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

NOVEMBER, 1959.

In case you have not received the previous number please inform the Editor or Publisher immediately.

पत्रिकामूल्यं निश्शेषं प्रेष्य उपकर्तव्यम् ।

Kindly help the poor journal by sending the arrears of your subcription

For the rate of subscription please see inside.

# UDYANA PATRIKA.

Annual Subscription Rs. Three only

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं त्रीणि रूप्याणि ।

२ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

३ वर्षमध्ये ग्राहकीभवतामपि कन्यासङ्क्रिकादिरेव पत्रिका प्रेष्येत ।

४ एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

५ प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

६ एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

७ लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या

निर्वाहकसम्पादकः *Mimamsarnava Mimamsakesari, Panditaraja* D. T. Tatacharya Siromani, M. O. L.

TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,

*Proprietor,* The Srinivasa Press,

Thiruvaiyaru P. O., Tanjore Dt.

## विषयाः ॥

1 भावनिष्यन्दः ।

2 शारदास्तुतिः ।

3 मुकुन्दमाला ।

4 वसुमान् ।

5 रामराज्यम् ।

6 शरणागतिः ।

7 पुस्तकपरामर्शः ।

8 प्रकृतिभेदः

यामेवोमां सुखमुपनयन् सौहृदात्पुष्पबाणः
क्रूरेण प्राग्वितथतपसा शर्व दग्धस्त्वयाऽभूत् ।
कृच्छ्राल्लब्धां चिरमनुसरन्नद्य तामेव कच्चित्
स्निग्धस्यास्य सरसि सदयः क्लेश्वराणामिदं स्यात् ॥ ३१ ॥

तापो नायं विरहसहभूः पश्य वामे भवानीं
गङ्गामिन्दुं व्यपनय मुधा किं नु शैत्योपचारैः ।
प्रालेयाद्रिं त्यज भज भुवं वच्मि ते तापहेतुं
कण्ठस्थं त्वां प्रदहति विषं निर्विषः सौख्यमेति ॥ ३२ ॥

भूभृत्कन्याविरहितमिमौ स्वर्धुनीशीतभानू
वातांकूरैर्व्यतिकरखरैरंशुभिश्चोग्रपातैः ।
तप्तं यन्निर्दयमदहतां तेन शम्भो त्वया किं
चूडाग्रन्थिग्रथितवपुषौ बन्धने पातितौ तौ ॥ ३३ ॥

यन्नेत्राणां त्रयमधिकरोत्यन्यनेत्रप्रभावं
यत्क्लेशाम्बु प्रभवति जनोत्तारणायातिपूतम् ।
धात्रीभारोद्धरणचणमादत्त यो नूपुरत्वे
वैचित्र्याणां निधिरवतु वः सर्वनाशे प्रणृत्यन् ॥ ३४ ॥

क्षीणः क्षीणः पुनरपि कलापोषमभ्येति चन्द्रः
पाथोनाथव्ययितसलिलाप्येधते स्वर्गसिन्धुः ।
लोलापि श्रीर्न तु रहयति त्वत्सखायं धनेशं
त्वामाश्रित्यश्वरमभिदुरैः केऽपि नन्दन्ति भाग्यैः ॥ ३५ ॥

एणीदृक्संग्रथितवपुषो यस्य दिव्यापदान-
श्रेणीश्लाघागलितममताविक्लवाः प्रत्नवाचः ।
वाणी तस्य स्तुतिविधिषु मे साहसेन प्रसन्ना
द्रोणीधारासरलगलना निस्समा निस्ससार ॥ ३६ ॥

वात्यावर्ताः क्षितिधरगृहाट्टालनिर्भेदिनोऽमी
विद्युद्वज्रव्यतिकरनिशाभीषणाः प्रावृषोऽमूः ।
भानोर्विश्वग्लपनकृदसावुग्रतापः स शीतो-
द्रेको यस्तु द्रढयति जलं त्वद्विभूतेर्विशेषाः ॥ ३७ ॥

पुष्णन्त्युर्वीं यदि जलधराः प्राणिनां भव्यहेतोः
पुष्प्यन्त्येते समयमनतिक्रम्य यद्वा वनान्ताः ।
कालं यन्निष्प्रतिहतगती पुष्पवन्तौ विधत्तः
सर्वं सर्वात्मक विचलति त्वन्महिम्नस्तु लेशैः ॥ ३८ ॥

सत्यैश्वर्ये स्वयमपि विभो गाहसे भिक्षुवृत्तिं
रिक्तास्तेऽपि त्वयि विनिहितक्षेमयोगा भवन्ति ।
किंस्विल्लोकत्रयपरिमितापारसंसारभाजः
कार्पण्यं ते, कथमितरथा युक्तमेतन्न विद्मः ॥ ३९ ॥

भीतास्त्वां ये भवपरिभवादाश्रयन्ते जनास्ते
सद्यः शम्भो त्रिभुवनकुटुम्बातिभारं वहन्ति ।
सर्वैश्वर्यप्रभुमपि परे त्वामुपाश्रित्य भिक्षां
हन्ताटन्ते तव कुटिलतामीश कस्मै वदामः ॥ ४० ॥

लोकानां त्वं प्रथमजनको बन्धुरुत्सन्नबन्धो-
रार्तत्राणव्रतमनुगतो भक्तिलेशोपगृह्यः ।
अप्यप्याध्वर्यवतरमिषाद्वंशवृद्धोऽसि नस्त्वं
कुत्रान्यस्मिन् गिरिश हृदयातङ्कमावेदयामि ॥ ४१ ॥

त्वय्याधत्तां कथमिव पदं चित्तवृत्तिश्चलानां
त्वत्सूक्तीनामलसमतिभिर्गृह्यतां केन भावः ।
कुर्मोऽक्षाणां कथमिव हठान्निग्रहं चञ्चलानां
यत् त्वत्सेवाप्रवणहृदयैः स्थीयते तत्प्रसीद ॥ ४२ ॥

शृण्वन्तोऽपि प्रतिदिनममी नामवाचः स्मरामः
शंसन्तोऽपि श्रुतिमुखरितान् त्वद्गुणान्नैव विद्मः ।
पश्यन्तस्ते भुवनरचनामन्धवद्भ्रम्भ्रमीमः
तत्त्वे नैजे गिरिश कृपया स्थापयास्मान् शिवाय ॥ ४३ ॥

निष्कृत्यम्भोऽञ्जलिरयमनैकान्तिनामिन्द्रियाणां
स्मृत्यारूढैः कुलपरिबृढैर्निर्गलन्नश्रुपूरः ।
वीचिव्रातो हृदि तरलितः शर्व सारस्वताब्धेः
भूयादर्घ्यं तव चरणयोर्भावनिष्यन्द एषः ॥ ४४ ॥

समाप्तश्चायं श्री महालिङ्गकविविरचितः
भावनिष्यन्दः ।

॥ श्रीः ॥

# ॥ अथ शारदास्तुतिः ॥

श्री महालिङ्गशास्त्रिणा विरचितः

अम्ब स्तुता त्वमभिषेक्ष्यसि मामपाङ्गैः
त्वद्दृङ्निपातविधुरस्तु कथं स्तवीमि ।
अन्योन्यमूलमुभयं तदिदं विभाव्य
मूकप्रणाममिह ते विदधामि खिन्नः ॥ १ ॥

अप्यन्यदेवकरुणालवमीहमानो
वाञ्छामि साधनतया स्तुतिरूपिणीं त्वाम् ।
सर्वार्थदा भवसि च स्वयमेव यत्त-
दन्योपसर्पणनिरुत्सुकतामुपैमि ॥ २ ॥

क्षुद्रैर्गृहोपवनवासविलोचनाद्यै-
राराधयन्तमतिसन्दधतेऽन्यदेवाः ।
एका त्वमात्मविभवं दिशसि श्रितानां
यत्तेऽमरत्वमुपयान्ति यशःशरीरैः ॥ ३ ॥

तिष्ठन्तु देवतगणेष्वखिलेष्वपि त्व-
मेकैव सेव्यचरणेति ममाभिसन्धिः ।
यद्वाणि तावककृपाविधुरस्य तुङ्गा
अप्याशिषः सपदि मोघतमा भवन्ति ॥ ४ ॥

न त्वां विना जगति कश्चन बोद्धुमीष्टे
बोद्धव्यमित्यपि न किञ्चिदृते भवत्याः ।
त्वामन्तरेण विफलः किल सर्ग एष
धातुर्नरा इति पृथग्विधिना मृगेभ्यः ॥ ५ ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधः खेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु ३३] कलि ५०६१ विकारि - वृश्चिक [सं ३
(1959-November)

## ॥ दैवम् ॥

यस्य कस्यापि कार्यस्य सिद्धौ द्वे कारणे अपेक्ष्येते । ते दैवं पुरुषकारश्चेत्युच्येते । पुरुषकारो नाम पुरुषप्रयत्नः ।

ये स्वप्रयत्नं विना दैवमात्रमाश्रयन्ति, ये च दैवमुपेक्ष्य स्वयत्नमात्रे प्रत्ययं कुर्वन्ति ते उभयेऽपि मिथ्यादर्शिनः । उभयेऽपि ते नूनं विफलमनोरथा भवन्ति ।

शास्त्राणि सर्वाणि इदमेवमुपदिशन्ति । अस्मत्पूर्वपुरुषाः सर्वे अत्र श्रद्धामकुर्वन् ।

इदानीं जनानां दैवे विश्वासः ह्रासं गच्छन् दृश्यते । ये नेतारः, राज्यशासने स्थिताश्च तेऽपि प्रयत्नमात्रस्य प्राधान्यं कुर्वन्ति ।

अस्मद्देशे अनादेः कालात् आरभ्य प्रवृत्तायाः जीवनपद्धतेः इदमेकं लक्ष्यमासीत्, यत् जनानां यः कोऽपि क्लेशो न भवेत्, सर्वा च सम्पत् समृद्धा स्यादिति । दैवानुग्रहं विना अस्मत्प्रयत्न-मात्रेण इदं फलं नैव सिद्ध्येदिति बिभ्यतः प्राञ्चः तदानुकूल्य-सम्पादने जागरूका अभवन् ।

धर्मव्यतिक्रमवर्जनमेव दैवानुकूल्यसम्पत्तौ उपायः । अतो लोकहितपरैः सर्वैः लोके धर्मव्यतिक्रमनिरोधे तीव्र उद्यमः कार्यः ।

यथा जनानां अन्नं वस्त्रं वासस्थानं च सुसम्पन्नं भवेत् तथा संविधाने दत्तदृष्टयः सांप्रतं अस्मद्देशपरिपालनाधिकारे स्थिता महापुरुषाः । एतदनुगुणां बहुमुखीं प्रवृत्तिं एते कुर्वन्ति ।

अथापि दैवानुकूल्यं न सम्पन्नमिति भाति । अद्य हि अस्मद्देशे क्वचिदतिवृष्ट्या, उत्कूलप्रवाहाभिः नदीभिश्च जनानां महती पीडाऽजनि । अन्यत्र च अनावृष्टिकृतेन क्षामेण । नावश्च पदे पदे नदीषु मज्जन्ति ।

मनुजानां अनृतवादशीलता कलहरुचित्वं अत्याशा परेषु दयादाक्षिण्यहीनकठिनहृदयता, हिंसारतिरित्येवमादयो गुणविपर्ययाश्च तदेव ज्ञापयन्ति ।

अभिनवाः विविधाः दुश्चिकित्सा रोगाः, बहूनि बहुविधानि अकालमरणान्यपि तल्लक्षणान्येव ।

यथा सर्वे दैवं किञ्चिदस्तीति दृढां प्रतीतिं लभेरन्, तत्प्रकोपभीत्या च अधर्म्यं पन्थानं अत्यन्तं त्यजन्तः धर्ममार्गानुसरणे दृढसङ्कल्पा भवेयुः, तथा समीचीनविद्याप्रचारपद्धतिः काचित् परिकल्पनीया अनुसर्तव्या च ।

## मुकुन्दमाला ॥

नमामि नारायणपादपङ्कजं
करोमि नारायणपूजनं सदा ।
वदामि नारायणनाम निर्मलं
स्मरामि नारायणतत्त्वमव्ययम् ॥ ३५ ॥

लौकिकेषु सर्वेषु भोगेषु विरक्तः, परमपुरुषचरणारविन्दे अनुरक्तः, महाराजः कुलशेखरः, उत्तमपुरुषार्थभूतं निश्शेषसंसारनिवृत्तिपूर्वकपरमपुरुषप्राप्तिरूपं मोक्षं काङ्क्षन् तदुपायतया प्रपदनमन्वतिष्ठत्। शरीरावसाने तस्य मोक्षो ध्रुवः। शास्त्रप्रामाण्यात्। प्रपदनं क्षणसाध्यो व्यापारः। तस्य च सकृदेव कर्तव्यत्वात् तस्मिन् कृते सति तदनन्तरं मोक्षार्थतया कर्तव्यं किमपि नास्ति। तेन किं प्रपन्नः प्रपत्त्यनुष्ठानानन्तरं आमरणं स्वच्छन्दवृत्तिर्भवितुमर्हति, इति चेन्नैव। प्रपत्त्युत्तरकालेऽपि तस्य कर्तव्यमस्ति। किं तत्? तदाह— नमामीत्यादिना।

नारायणपादपङ्कजम्। नारायणशब्दार्थ उक्तः। तस्य परस्य ब्रह्मणः पाद एव पङ्कजं, तत्। 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति सूत्रविहितः उपमानोत्तरपदकर्मधारयसमासोऽयम्। "पादश्च तत् पङ्कजं च" इति तात्त्विकं विग्रहवाक्यम्। अत्र सामानाधिकरण्यलभ्यस्य आरोपिताभेदस्य स्पाष्टयाय पाद एव पङ्कजमिति विग्रहप्रदर्शनम्। अत एवात्र रूपकमलङ्कारो नोपमा।

नमामि। प्रसिद्धस्य पङ्कजस्य नमस्कारानर्हत्वेऽपि भगवत्पादात्मकस्य तस्य नमस्कार्यत्वं घटत एवेति बोध्यम्।

पूजनम्। आसनार्घ्यपाद्याचमनीयस्नानीयगन्धपुष्पधूपदीपनैवेद्यताम्बूलाद्युपचारसमर्पणम्। इदं सदा प्रत्यहं विहितेषु कालेषु करोमि।

अनेन पादद्वयेन कायिकं भगवद्भजनमुक्तम्। अथ वाचिकमाह तृतीयेन पादेन। नारायणस्य नाम वदामि कीर्तयामि। कस्मात्। यस्मात् तन्निर्मलम्। स्वबोध्यस्य निर्मलत्वात् स्वयं निर्मलम्। स्ववक्तृगतसर्वमलहरत्वाच्च निर्मलम्।

अथ मानसमाह स्मरामीति। नारायण एव तत्त्वं प्रमाणतो दृढप्रतिपन्नं पारमार्थिकं वस्तु। तच्च अव्ययं व्ययरहितं, यागादिवत् अर्थकामवच्च नश्वरं न भवति। तत् स्मरामि निरन्तरचिन्ताविषयीकरोमि।

यद्यपि सकृदनुष्ठितेन प्रपदनेन मोक्षः सिद्धः, तदर्थं पुनः कर्तव्यमन्यत् किमपि नास्ति, तथापि शास्त्रोक्तरीत्या तत्तत्कर्मानुष्ठानप्रवणैः मनोवाक्कायैः भगवद्भजनं यावदायुषं कर्तव्यम्। भगवदाज्ञापरिपालनेन तत्प्रीतिजननात्। स्वयं पुरुषार्थतया मोक्षाङ्कुररूपत्वात्। भगवद्भक्तैरनुष्ठीयमानस्य सर्वस्य कर्मणः यज्ञरूपत्वेन सर्वलोकक्षेमङ्करत्वाच्चेति भावः।

पादचतुष्टयेऽपि नारायणशब्दकीर्तनं तदेकपरत्वमुखेन पारमैकान्त्यं व्यञ्जयति।

# ॥ वसुमान् ॥

वसुमान् प्रातरजायत; सायं तस्य जननी प्रसववेदनामसहमाना परासुरभवत् । प्रियावियोगदुःखेन अतिमात्रं पीडितः तस्य पिताऽपि क्रमेण अनाहारकृशः विविधरोगाभिभूतः कतिपयैर्मासैः दिवमगच्छत् । दरिद्रदम्पत्योः पुत्रः अनाथो वसुमान् लोकापवादभीतेन मातुलेन मणिबाहुना स्वगृहं नीतः तत्रैव वव्रृधे ।

धीमान् फुरफुरायमाणः रूपसम्पन्नः गम्भीरचेष्टितश्च वसुमान् विद्याग्रहणेऽपि रुचिमान् पटुश्चाभवत् । अस्य तद्गृहगमनानन्तरं कतिपयेषु वर्षेषु अतीतेषु तन्मातुलस्य एका पुत्री, तामनु एकः पुत्रश्च अजायेताम् ।

शिश्वोः रक्षाभरः वसुमतैव ऊढः । गृहकृत्यानि कुर्वती तस्य मातुलानी तयोः रक्षणे तं नियुज्य सर्वं चकार ।

धनार्जनाय मणिबाहुना प्रतिपन्ना मार्गा बहवः । वार्धुषिको बभूव । कृषिं चकार । अजगोमहिषान् अपुषत् । वाणिज्यमवलम्बे । पौरजनव्यवहारेषु घटकोऽभवत् । अन्यच्च अन्यच्च अकरोत् । बहिर्व्यवहारयोग्यं वयः प्राप्तवति वसुमति प्रायः तमेव नियुज्य स्वकृत्यं सर्वं निर्वर्तयामास ।

अर्थे बहुतृष्णो मणिबाहुः । तेन सः अत्यन्तं निष्करुणो निस्स्नेहो बभूव । येन येन जनेन सह अयं कञ्चन व्यवहारमकरोत् सस: अन्ते उद्विग्नः सन्तप्तहृदयः आक्रोशी अस्य आत्यन्तिकविनाशाशंसी च बभूव । काले गच्छति अस्य महती अकीर्तिः परितो जजृम्भे । क्रूरः, पापिष्ठः, नृशंसः, राक्षसः, जनशोणितपायी, पिशाचः इति सर्वत्र जना गर्हयामासुः ।

वसुमान् यदा यदा यत्र यत्र गृहाद्बहिरगच्छत् तदा तदा तत्र तत्र एवं उत्कटां स्वमातुलनिन्दां क्रियमाणामाकर्ण्य परमं विषादं प्राप । कोऽत्र प्रतीकारः । चिरं स निदध्यौ । अन्ते कञ्चन निश्चयं कृत्वा यत्नेन धैर्यमालम्ब्य साक्षान्मातुलं सम्बोध्य उच्चैरुवाच—

मातुल ! अहं बालः, भवान् वृद्धः । अथापि अगत्याऽद्य इदं मे वक्तव्यं भवति । अपरिहार्यमिदं मे विनयातिलङ्घनं भवता क्षन्तव्यम् । अक्षमाऽपि न मे खेदाय भविष्यति । भवन्तं प्रति सर्वे जना अत्र महान्तं आक्रोशं कुर्वन्ति । सर्वत्र सर्वदा दुःश्रवा वाचो विसृजन्ति । किन्तु स जीवति यो जनैराक्रुष्टो जीवति । धिगिदं जीवितम् .... .... ....

असमाप्तवचन एव वसुमति एतावन्मात्रश्रवणेन उज्जृम्भित-क्रोधाभिताम्रभयङ्करमुखो मणिबाहुः अङ्गारवर्षिभ्यामिव चक्षुर्भ्यां तं पश्यन् नर्दति स्म—

"अनात्मज्ञ, अवस्तो, धूर्तवटो, किंनु ते इदं धाष्टर्यमदात् । मम उपदेष्टा त्वम् ! अनाथ त्वामानीय यदपोषयं तस्य सम्पूर्णं प्रतिफलं इदानीं लब्धवानस्मि । अपधाव शुनक अस्मद्गृहात् । यदि क्षणमेकं विलम्बसे अयोघनेन ते शिरो भेत्स्यामि...."

ईदृशमनुष्यसंवासात् वरं वीथीषु भ्रमणं अनशनमरणं चेति मन्यमानो वसुमान् बहिर्जिगमिषुः परावर्तत । तावदनुधाव्य तमु-त्तरीये गृहीत्वा पुनर्ननर्द मणिबाहुः—

"कृतघ्न रासभ, किमिति ते उत्तरीयमन्यत् । इदमुन्मुच्य निधेहि । अपक्राम एकवस्त्रः । इदमन्तरीयमप्युन्मोच्य नग्न-स्त्वं निष्कासनीयः । न तु तथा चिकीर्षामि ।"

तथा कृत्वा वसुमान् एकवस्त्रो निश्चक्राम। परिचितानां जनानां दृष्टिं परिहरन् निलीय निलीय अलक्ष्यं क्वापि क्वापि चरित्वा परिश्रान्तः निशायां अष्टसु घण्टासु कस्यचित् गृहस्य बहिर्वेदिकायां शयित्वा गाढं निदद्रौ। मुहूर्तमात्रावशिष्टायां रात्रौ प्रबुद्धः सः अन्तर्गृहं वृत्तं सल्लापं एवमशृणोत्—

—पश्यसि कालस्य कौटिल्यम्। योग्यः विश्वसनीयः आर्जवेन निर्दिष्टकार्यनिर्वाहप्रवणो मनुष्यो दुर्लभः। कथं नाम क्वापि प्रवृत्तिरस्माभिः कर्तुं शक्यते। बहु दक्षः। प्रीत्या सोपचारं वर्तयामः। तथाऽपि वक्रिमाणमेव प्रदर्शयन्ति। कलहायन्ते। अपक्रामन्ति। —को नाम इतःपरं असत्कृते अभिनवो ब्रह्मणा स्रक्ष्यते? तमेव आहूय पुनर्नियोजयत्वार्यपुत्रः, यः ह्यो गतः।

—न न। विषयमजानती त्वं एवं भाषसे। प्राणापायेऽपि न तं पुनर्नियोजयिष्यामि। कार्यालये महान्तं क्षोभमेष उदपादयत्। दुर्जनेषु अग्रगण्यः। अन्यस्य योग्यस्य कस्यचिल्लाभे व्यापारोऽनुवर्तनीयः। अन्यथाऽवस्थापनमेव। स्थित्वा पश्येम किं करोति भगवानिति।

इदं श्रुत्वा भगवन्तं स्मरन् वसुमान् शरीरशोधनं दन्तधावनं च कृत्वा प्रत्यागत्य प्रभाते तद्गृहस्वामिनं द्रष्टुमनाः वेद्या अवतीर्य सरस्तीरमगच्छत्।

# रामराज्यम् ॥

(उत्तमस्य राज्यस्योत्तमो राजा)

वि. वि. श्री.

## द्वितीयोऽङ्कः । प्रथमं प्रेक्षणकम् । (अनुवृत्तम्)

सीता— न तथा, प्रभो ! न तथा । तानि विप्रवासवर्षाणि चतुर्दश अनुपश्यन्त्या मे इदानीमपि मतिर्भवति — मम दशाया नान्यथाभाव इति । आवयोरुभयोरपि दैवेन तद्विहितमिति मेऽध्यवसायः ।

रामः— एवं त्वया उच्यमानं शृण्वन् प्रीतो भवामि ! अस्मदीयानि दुःखानि क्षणिकानि । प्रजवि वर्तमानं यदा स्मृतिरूपां प्राचीनवस्तुशालां प्रविश्यावतिष्ठते तदा तत् अनुपदं 'पुराणं' भवति, यस्य कीर्त्यमानस्य श्रवणमस्माकं प्रियं भवति, अथवा सुलिखितं चित्रं भवति, यत् कियत् दूरे स्थित्वा पश्यन्तो वयं आनन्दमनुभवामः । तदस्तु । ह्यो निशि मया दृष्टः स्वप्नः अरण्यविषयः, तत्र यत् आवां अनियुक्तौ अवसाव तद्विषयश्च ।

सीता— हा हा ! तानि दिनानि ! मम मनःप्रियाणि तानि !

(द्वारपालः प्रविशति)

रामः— का वार्ता ? द्वारपाल ।

द्वारपालः— क्षमतां मां महाराजः । तत्र भवान् महर्षिर्वसिष्ठः महाराजं दिदृक्षुः आगच्छन् अस्ति । तस्य शिष्यः आधाऽय पूर्वमेवावेदयति स्म ।

रामः— साधु ।

(द्वारपालो निष्क्रामति)

(सीतां प्रति) अचिन्तितो महर्षेरागमः । किं तावदागमनप्रयोजनं भवेत् ?

सीता— शीघ्रमेव ज्ञास्यसि, प्रभो ! किमहं अपसराणि ?

रामः— न, न तथा । त्वदपसरणस्य नास्त्यावश्यकता । प्रतीक्ष्य पश्येम । (कवाटं झटिति अपावृतं भवति । सस्मितमुखो वसिष्ठमहर्षिः प्रविशति । तद्दर्शनानुपदं सीतारामौ तं प्रणमतः । अभिवादयते च रामः)

वसिष्ठः— उभौ युवां लक्ष्मीनारायणाविव रघूणां राष्ट्रमिदं शश्वत् पालयतम्। युवयोः साम्राज्ये इयं पृथिवी धर्मराज्यस्य मातृकायताम्। (रामेण निर्दिष्टे पवित्रे आसने उपविशन्) श्रीरामचन्द्र उपविशतु भवानपि। (रामः किञ्चिद्दूरे नीचैरासने उपविशति)

रामः— अतर्कितेन अनेन अभ्यागमेन यन्मां भगवान् सम्भावयति तत्र को हेतुः स्यादिति विस्मयमानमना अहमभूवम्।

वसिष्ठः— राम! सम्यग्दर्शी त्वम्। अद्य प्रभाते उत्थितमात्रस्य मे भावः कश्चिदुद्भूत। वस्तुतस्तु अयमभिप्रायः अतीतेषु कतिपयदिनेषु तदा तदा मे मनसि प्रादुर्भवन्नेव वर्तते। तदर्थं अद्य प्रातः त्वां द्रष्टुं मे मतिरुद्भूत।

रामः— कच्चित् तत् आवाभ्यां ज्ञातुं शक्यम्?

वसिष्ठः— अवश्यं तद्युवाभ्यां ज्ञातव्यम्। युवयोः सकाशे तद्वक्तुमेव अहमद्य अत्रागतोऽस्मि। तदिदम्। यतोऽद्य सर्वं कार्यं निष्पन्नं, त्वं च भवत्पूर्वपुरुषाध्यासिते सिंहासने अन्ततोऽभिषिक्तः, तत इदं मे अभात यत् पुनरप्यहं हिमाद्रिशिखरमारुह्य तपसा, समाधिना, अतीन्द्रियाह्लाददायिना परमात्मयोगेन आयुःशेषं नयेयमिति।

(सीता रामं पश्यति)

रामः— कुतो नु भगवन्, सहसा अयमध्यवसायः? एतच्छ्रुत्वा उभावप्यावां विस्मितौ स्वः। अन्तर्विषण्णौ च।

वसिष्ठः— श्री राम! नेदं मया वक्तव्यम्। सर्वेऽस्माकं समागमाः नियतं विप्रयोगावसानाः। महान्तः असामान्यवैभवाश्च बहवोऽस्मत्कुलपूर्वपुरुषा अतीताः। राजसेवया तदास्थानोपस्थानेन इतोऽपि कियन्ति वर्षाणि वृथाऽतिवाहयेयम्? त्वदवतारस्य पट्टाभिषेकस्य च कृते कृतप्रतीक्षोऽहमिति भाति। तत्सर्वमद्य निर्वृत्तम्। परिश्रान्तं, तथा जनसङ्घातेभ्यः कलकलेभ्योद्विग्नं आत्मानं सम्प्रति मन्ये। उन्नतानां पर्वतानां अरण्यानां च आह्वानं अनिराकार्यं भवति। ते शान्तिमादिशन्ति, ध्यानं च। तन्मे आत्मनः परमं प्राप्यम्। कियच्चिरं मया अन्यपरेण भवितुं शक्यम्?

रामः— भगवन्! न भवत एवमेतत्। अनृषयो वयमपि आनन्दपुलकिता भवामः, यदा अभ्रलिहान् वृक्षान्, अरण्यमृगान्, कूजतः पक्षिणः, प्लवमानाः कुल्याः, जवनप्रवाहाः सरितः, गम्भीरान् गण्डोप-

लान्, पत्तनधूलिभ्यः हेवाकेभ्यश्च दूरे विजने जायमानं सुखं च चिन्तयामः ।

वसिष्ठः — परन्तु भवान् राजा । प्रजाशासनं ते प्राप्तम् । स ते धर्मः । तं विहाय भवता भवत्पूर्वपुरुषैरिव नापसर्तव्यम्, तावत्, यावत् अन्तिमा दशा भवति ।

रामः—सत्यं, सर्वथा सत्यं, भगवन् । इयं मतिः अत्र मां अवस्थापयति । अन्यथा इयं मे धर्मपत्नी सीता अहं च अयोध्यासौख्येभ्यः दण्डकारण्य-दुःखानि शतगुणं वरीयांसीति परिगृहीतवन्तौ स्याव ।

वसिष्ठः— किन्तु तव युक्तं स्थानं भवत्पूर्वपुरुषाधिष्ठितं सिंहासनम् । मम तु हिमाचलशृङ्गम् ।

रामः— न भगवन् । नात्र मे सम्मतिः । न शक्यं मेऽत्र सम्मतिं कर्तुम् । ये ऋषयः साधनावस्थायां वर्तन्ते, तेषां तपःकरणमावश्यकम्, न तु भवादृशानां, ये प्राप्तसिद्धयः । एषां अरण्यगमनं केवलमात्मम्भरित्व-प्रयुक्तम् । शास्त्रानुशिष्टमेषां लोकहितप्रावण्यम् । जनानां मध्ये वसन्त इमे तेषामुपदेशं कर्तुं, मार्गं दर्शयितुं, रक्षां कर्तुं च अर्हन्ति ।

वसिष्ठः— श्री राम ! भवानद्य स्वार्थपरो दृश्यते ।

रामः— अहमङ्गीकरोमि, अहमिदानीं स्वार्थपरः । एवंविधेऽवसरे स्वार्थ-परता मे धर्मः । अहमद्य स्वार्थपरः, न मदर्थे, अपि तु प्रजानां कृते; न मदर्थे, अपि तु अस्याश्चिरन्तन्या राजधान्याः देशस्य च कृते ।

वसिष्ठः— उभौ युवामत्र वर्तेथे । अनुरक्ता भवद्भ्रातरः अत्र वर्तन्ते । भवन्तः सर्वे प्रजापालने जागरूकाः का नाम आवश्यकता ममात्र अवस्थानस्य ? मदीयं कार्यमवसितम् । ममाधिकारः समाप्तः, इति मे मतिः । तन्मामनुजानीहि अधिपर्वतं मदीयमाश्रमं प्रति निवर्तितुम् । नक्तन्दिवं तदनुध्यानपरोऽहं वर्ते ।

रामः— भगवन् अहं इयं सीता च भवन्तमनुगमिष्यावः ।

वसिष्ठः— न, न, न । न तद्भवितुमर्हति । न तत् कर्तुं शक्यम् । नूनं धर्म-मार्गादपक्रमणं तद्भवेत् ।

रामः— स एको हेतुः, येनाहमत्र वर्ते । किं भवान् मन्यते अधिकार-तृष्णया, भोगलोलुपतया, राजशब्दानुरागेण वा इदं सिंहासनमह-मङ्गीकृतवानिति ? नैव भगवन् । भार एव केवलं शिरसः किरीटः ।

बसिष्ठः— श्री राम ! इमां ते वाचं शृण्वन् दूये। यौवने त्वमद्य वर्तसे। भवता क्रियमाणमिदं राज्यशासनं भविष्यत्कालस्य कृत्स्नस्य मातृका भविष्यति। भविष्यतां वर्षसहस्राणां रामराज्यं नाम अनुकरणीयमुत्तमं राज्यं, यत्नात् साधनीयमुत्तमं लक्ष्यं भविष्यति।

सीता— भगवत आशीर्वादेन तथा भवतु।

# शरणागतिः ॥

[ओट्टूर् उण्णि नम्बूदिरिप्पाड्]

(पु. ३३. स. १ अनुवृत्तिः)

दंष्ट्रोग्रभ्रुकुटीकरालवदनानुच्चाट्टहासोल्बणान्
दृष्ट्वा कालभटान् मदीयनयनद्वन्द्वेन संप्रोक्षिते।
नीलाम्भोदतया क्षणात् परिणते बाष्पे स्मितार्द्राननं
बर्हालङ्कृतकुन्तलं मुरलिकां चालोकयानि स्फुटम् ॥ ६ ॥

मर्त्यैस्संकथितं सुरैः श्रुतमृषिश्रेष्ठैर्निदिध्यासितं
वेदनातैर्विचितं विधिप्रभृतिभिर्दूरे सकृद्वीक्षितम्।
गोपालैः करपल्लवेषु विधृतं गोपीभिरालिङ्गितं
वंशीभिः परिचुम्बितं च किमपि ज्योतिः पुरो भातु मे ॥ ७ ॥

आदौ कर्णपुटे ततो हृदि पुनर्नेत्रे ततो हस्तयो-
रुत्सङ्गेऽथ पुनश्च वक्षसि तदन्वंसे क्रमान्मूर्धनि।
सर्वाङ्गेषु शनैस्समस्तधमनीष्वन्ते ममान्तर्बहि-
श्चैवं क्रीडतु नन्दगोपतरुणीसर्वस्वभूतश्शिशुः ॥ ८ ॥

# पुस्तकपरामर्शः ॥

**वैदेहीविवाहम् ।** महामहोपाध्याय पण्डितराज शास्त्ररत्नाकर भूतपूर्वमद्रप्रदेशास्थानविद्वत्कवि श्री के. एस्. कृष्णमूर्तिशास्त्रिणा प्रणीतम् । गद्यम् । No.15, VI Main Road, Raja Annamalaipuram, Madras-28. अतो लभ्यम् । मूल्यं रू. 2. 50.

न परं विशिष्टेन वैदुष्येण बहूनां काव्यानां निर्माणेनापि प्रसिद्धः श्रीमान् शास्त्री अत्र श्रीमद्रामायणबालकाण्डकथां कृत्स्नां गद्यैर्निबध्नाति । प्रौढा रीतिरादृता । कादम्बरीशैल्यनुसरणे महानादरो दर्शितः । श्लेषालङ्कारनिबन्धने चातुर्यं प्रकाश्यते । प्रतिवाक्यं अनुप्रासः समुल्लसति । वाल्मीकेरुक्तिषु यत्र यत्र उपपत्तिरपेक्ष्यते तत्र तत्र सा काचिदिह प्रादर्शि ।

लक्ष्यज्ञवैयाकरणत्वात् कविना व्युत्पन्नानि शब्दरूपाणि बहूनीह प्रयुक्तानि । तेषु च केषाञ्चित् टिप्पण्या वैशद्यमकारि । वाल्मीकिप्रयुक्तान्येव च पदानि भूयिष्ठानि प्रयुज्यन्ते ।

वैदेहीविवाहमिति क्लीबं कुतः ? प्राप्स्यसे (14-9) इत्यात्मनेपदं कथम् ? 'प्रपत्स्यते प्रायश्चित्ताय' (15-20) इति सम्पद्यतिस्थाने प्रपद्यतिरपि किमस्ति ? 'अनुभवपराकाष्ठां' (110-8) इत्यत्र पराशब्दस्य पुंवद्भावः कुतो न भवति? इति जिज्ञासोदयात् एवमादिष्वपि स्थलेषु टिप्पणीयोजनमपेक्ष्यते । 'तस्मायनार्थाय' (25-16) इति सन्धिः 'नैयून्यं' (88-3) इति रूपं च साध्वपि न रसिकमनोहरमिति भाति ।

अश्वमेधानुष्ठानकाले देवाः ब्रह्मणि रावणोपद्रवविज्ञापनमकुर्वन्निति श्रीमान् शास्त्री वदति (25)। अश्वमेधसमाप्त्यनन्तरं पुत्रकामेष्टिकाले तद् वृत्तमिति रामायणे प्रतीतिर्भवति ।

कादम्बरीशैलीति कृत्वा प्रायः सर्वे गद्यकाराः वाक्येषु पदानां न्यायप्राप्तं स्वरससिद्धं क्रमं परित्यज्य क्रमान्तरमाश्रयन्ति। वैदेहीविवाहेऽपि प्रतिवाक्यमिदं दृश्यते । तत् किमावश्यकम् ? किं तद्रसपरिपोषाय अथवा प्रतिबन्धायेति विचिकित्साऽस्माकं बलवती ।

"प्रमोदमानस्तत्रायासीद्यत्र भस्मराश्यकारिषत रोषानलेन भगवतः कपिलस्य स लघुविक्रमः पितरः सर्वे सागराः" (78-9)

इतीदं वाक्यं सहृदयाः परामष्टुमर्हन्ति । स्वयं सहृदयसार्वभौमः श्रीमान् शास्त्री च । अस्मिन् काले ललितपदविन्यासाः सुप्रतीतार्थाश्च निबन्धाः संस्कृताध्यायिनामुपकाराय कल्पेरन् । (सं)

TIRUPATI ... KENDRIYA ... LIBRARY



# प्रकृतिभेदः ॥

1

माता— जाते ! जाग्रती वर्तस्व गृहे शिशुं रक्षन्ती । अहं गत्वा प्रदर्शनावसाने त्वरितं प्रतिनिवर्तिष्ये ।

पुत्री— (सक्रोधं) याह्यम्ब, त्वमेव एका नित्यं सिनिमादर्शनाय गच्छसि । न मां कदाचिदपि सह नयसि ।

माता— पश्य वत्से ! यदि उभे अपि आवां गच्छेव तर्हि अधिको व्ययो भवेत् ।

पुत्री— तर्हि त्वं स्थित्वा शिशुं रक्ष । अहमेका गच्छामि ।

माता— एकाकिन्यास्ते प्रेषणं न युक्तम् । वाच्यता भवेत् ।

पुत्री— अपेहि मातः । सर्वत्र काञ्चिदनुपपत्तिं वदसि । त्वमेका सर्वदा दिदृक्षसे । वत्साऽपि एकस्मिन् दिने पश्यत्विति अनुकम्पा ते नास्ति ।

माता— धिक् त्वामविनीते । जिह्वां ते छेत्स्यामि, यद्येवं पुनरुद्धतं भाषिष्यसे । रक्ष गृहं शिशुं च । अन्यथा प्रहारान् ग्रहीष्यसि ।

2

माता— वत्से ! कथमेवमलसा भवसि । परिधत्स्व अभिनवं चेलं कञ्चुकं च । कालोऽतिक्रामति । विलम्ब्य गमने चीटी न लभ्येत । त्वरया गन्तव्यम् ।

पुत्री—अम्ब ! नाहमुत्सुकाऽस्मि सिनिमादर्शने । गृह एवाहं वर्तिष्ये । त्वं याहि ।

माता— वत्से ! न तथा ब्रूहि । त्वयाऽवश्यमागन्तव्यम् । त्वां विना अतिश्लाघ्यस्यापि पटस्य प्रेक्षणं कथं मे रोचेत ?

वृद्धा—अलमलं महानुभावे ! कथं स्वयं नष्टा परामपि नाशयसि । सिनिमादर्शनव्यसनं तवैवायुक्तम् । कथं नाम स्वयमनिच्छन्तीं वत्सामपि बलादाकृष्य नेतुमिच्छसि ? तथ्यं किलैतत् यदुच्यते पुत्राणां शत्रू मातापितराविति ।

माता— तर्हि अहमपि न गमिष्यामि । किमहं वत्सां विहाय स्वयं मिष्टमश्नीयाम् ?

Registered No M 2300.

Book XXXIII || श्रीः || No. 4

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

—:o:—

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३३] कलि ५०६१-२ विकारि-शार्वरी—धनुः [सं ४

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

DECEMBER, 1959—60.

In case you have not received the previous number please inform the Editor or Publisher immediately.

पत्रिकामूल्यं निश्शेषं प्रेष्य उपकर्तव्यम्।

**Kindly help the poor journal by sending the arrears of your subcription**

For the rate of subscription please see inside.

# UDYANA PATRIKA.

Annual Subscription: Rs. Three only.
Foreign: Twelve Indian Rupees.

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं त्रीणि रूप्याणि।

२ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।

३ वर्षमध्ये ग्राहकीभवतामपि कन्यासङ्क्रिकादिरेव पत्रिका प्रेष्येत।

४ एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।

५ प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।

६ एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः। (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण।)

७ लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या

निर्वाहकसम्पादकः *Mimamsarnava Mimamsakesari, Panditaraja* D. T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.


## विषयाः ॥


1 शारदास्तुतिः। (Sri Y. M. S.)
2 वसुमान्।
3 शास्त्रानुबन्धः श्रीगीतार्थदीपः। ३१७-३२०
4 The Gitartha Sangraha. 21–24

KENDRIYA SANSKRIT VIDYAPEETHA TIRUPATI LIBRARY

अम्ब प्रसादसुमुखी त्वमुपासकाना-
मित्यन्यदैवतसमः कतमो गुणोऽयम् ।
तेषां यदीक्षणतरङ्गितकिङ्करात्व-
मङ्गीकरोषि कृपया तव सा प्रतिष्ठा ॥ ६ ॥

न त्वां प्रसादयितुमम्ब परिश्रमेण
यज्ञस्तपो व्रतमिति प्रचुरं विचेयम् ।
यावज्जनो रसयति श्रुतिकोमलानि
पद्यानि तावदमुमभ्युपतिष्ठसे त्वम् ॥ ७ ॥

शम्भुर्निपीतगरलस्तरलो मुरारि-
र्नारीं वहन्नुरसि पानजडो बिडौजाः ।
अन्तर्मुखः कमलभूः क इवाभ्युपेयो
वाणि त्वमेव शरणार्थिषु जागरूका ॥ ८ ॥

मूर्तित्रयं यदवलम्बबलेन नूनं
सर्वज्ञताबिरुदमुद्वहति प्रसह्य ।
तस्यास्तवाम्ब गुणवर्णनचापलाय
निर्लज्जता भगवती समचोदयन्माम् ॥ ९ ॥

त्वद्वर्णनाय कृतसाहस एष एवं
पूतो भवेयमपि कैश्चन वाक्प्रपञ्चैः ।
वीणाविनोदिनि मृणालचयावदाते
मातः कथं नु परुषान् विषहिष्यसे तान् ॥ १० ॥

संक्लेशयामि भवतीं परुषोक्तिगुम्फै-
रित्यत्र भारति भवेन्मम कोऽपराधः ।
त्वद्वल्लकीक्वणितचारुपदां गिरं मे
सद्यः प्रसादयसि चेत् सहस्रैस्स्तवीमि ॥ ११ ॥

गैर्वाणि मातरलसे मयि लोचनांशु-
रुल्लासमृच्छति यदा दलदुत्पलश्रीः ।
तावच्छशाङ्कपरिवर्धितसिन्धुवीचि-
लीलासमुद्गलितवाग्विभवो भवेयम् ॥ १२ ॥

अम्ब त्वदीयकरुणामपहाय कः स्या-
दप्राकृतेन महसा प्रतिबोधितात्मा ।
दग्धेन्द्रियाभिलषितानि परापतन्तो
नान्तः प्रबुध्य कति मृत्युमुखं विशन्ति ॥ १३ ॥

कत्यम्ब निर्झरनिरर्गलवाङ्महिम्ना
वीक्षाविधेयमखिलं जगदावसन्ति ।
कत्यम्ब तावककृपाविधुराः परास्ताः
खिन्नाः स्वयं धिगपरानपि खेदयन्ति ॥ १४ ॥

एको हठेन गदितुं सदसि प्रणुन्नो
विस्मृत्य चिन्तितमपि स्तिमिताक्षिगोलः ।
सोत्कम्पमुद्गिरति जीवमिवाप्सु मग्नो
व्यत्यस्तभावमसमर्थपदं च वाक्यम् ॥ १५ ॥

अन्योऽभिवर्षुक इव प्रणदन्पयोदो
विक्रम्य यावदवकाशमभिप्ररूढः।
आसारमारवमपि स्फुरणं परेषा-
मुज्जृम्भते समवधीर्य गिरां विलासैः॥ १६ ॥

मूकस्य वाग्विभवमर्पयति स्म देवी
श्रीकामकोटिरिति न प्रकृतोपयोगि।
प्राप्ते वचस्यपि जडात्मतया तु मूकं
वाचालमाकलयितुं चतुरा त्वमेव॥ १७ ॥

बाल्यादधीतमनुवेलमभिज्ञसंस-
दासेविता परिचयोऽपि दृढो बभूव।
भूभृत्सभे वचनसाहसकाङ्क्षिणो मे
कः कण्ठमारुजति केन दिशोऽपि शून्याः॥ १८ ॥

न त्वं प्रसीदसि चिराय समर्थिताऽपि
कम्पोत्तरं स्खलसि संसदि लज्जितेव।
प्रायः प्रयत्नविधृतापि परिच्युतासि
लब्ध्वापि वाणि भवतीं न हि निर्वृतिर्मे॥ १९ ॥

त्वद्वीक्षणामरगवी स्वकुलार्जिताया
स्वत्वे ममास्ति न तया परमस्ति कृत्यम्।
सम्प्रत्यनन्तरदशामियमभ्युपेता
दोहाक्षमा भवति यन्मम दुर्भगस्य॥ २० ॥

स्वैरं प्रदातुरुपकर्तुरकारणेन
कृच्छ्रेऽपि धर्ममवतो नियमस्य गोप्तुः ।
याः सम्मुदः परिणमन्ति शतानि तासां
संसत्सु ललितगिरः परिहृत्य खेदम् ॥ २१ ॥

वाग्देवि मह्यमुपकल्पय, चापलं मे
तादृक्षदिव्यफलभाजनतां कथश्चित् ।
मातेव मामनुचिताभिनिवेशदुःख-
शीलं कुमारमुपलालय वाञ्छितार्थैः ॥ २२ ॥

दग्धे मरौ समुदितेव जलप्रणाली
धूमावलौ घन इव स्फुरितः कृशानुः ।
चर्मण्युदीर्ण इव मञ्जुमृदङ्गनादो
वाग्वैखरी मयि कदा नु तरङ्गिता स्यात् ॥ २३ ॥

शुभ्रापि वर्षसि कवित्वमरन्दधारां
स्निग्धापि तामसमपोहसि संश्रितानाम् ।
हासैः सविद्युदुदयापि दृशौ धिनोषि
कादम्बिनि त्वमयि मे मनसि प्रवेशाः ॥ २४ ॥

प्रातस्समुल्लसितपङ्कजगर्भशोणौ
वैरिञ्चि मञ्जुलतमौ चरणौ भवत्याः ।
निस्सङ्गिनि प्रहसिते हृदि सन्निधाप्य
मञ्जीरशिञ्जितमुपाहर कर्णयोर्मे ॥ २५ ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधः खेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु ३३] कलि ५०६१ विकारि - धनुः (1959-December) [सं ४


## ॥ वसुमान् ॥ (2)

वसुमान् रात्रौ यत्र शयितः तस्य गृहस्य स्वामी रत्नकान्तो नाम कश्चन धान्यवणिक् । कृषीवलानां यदा यदा अर्थापेक्षा भवति तदा तदा ते अस्य सकाशमेत्य प्रार्थयन्त । गर्भश्रीमानयं वाणिज्येन च आर्जितभूरिधनः तेभ्यो यावदपेक्षं वित्तं ददौ । अस्य गुणैः प्रीताः उत्पन्नगाढानुरागाश्च ते क्षेत्रेभ्यः सङ्ग्रहणसमनन्तरं व्रीहयः माषाः मुद्गाः आढक्यः, इतीमानि धान्यानि कुस्तुम्बुरूणि मरिचफलानि च गोणीषु सम्भृतानि द्विवृषभशकटैरानीय अस्य आपणे समर्पयन्ति स्म । रत्नकान्तः कृषीवलानां समक्षमेव एकैकस्य रूप्यस्य अर्धाणकोऽधिक इति मूल्यं मनाक् वर्धयित्वा अन्येभ्यो वणिग्भ्यः तानि पण्यानि विक्रीणीते स्म । तैर्दत्ते मूल्ये अर्धाणकं स्वयं शुल्कं गृहीत्वा रूप्यं कृषीवलेभ्यो ददौ । अनेन क्रमेण तस्य प्रतिदिनं बहूनां रूप्याणां लाभोऽभवत् ।

एवं वाणिज्यं कुर्वतो रत्नकान्तस्य, सन्निहितग्रामवासिनां कृषिकाणां, खण्डविक्रयिणां वणिजां च दर्शनाय असकृद् बहिर्गन्तव्यमासीत् । एवं गमनावसरे आपणे स्थित्वा कार्यनिर्वाहाय विस्रम्भार्हः गुणवान् मनुष्यः कश्चिदपेक्षितोऽभवत् । कश्चन न्ययुङ्क्त । सः द्वित्रान् मासान् स्थित्वा सहस्रसङ्ख्यानि रूप्याणि गृहीत्वा अनन्यविदितं पलायत । एवमेव ततः परं पञ्चषा अकुर्वन् । तेन इतिकर्तव्यताऽऽकुलो रत्नकान्तः प्रत्युषसि प्रबुद्धः सह प्रबुद्धायां स्वपत्न्यां स्वकार्यनिर्वहणक्षमस्य योग्यपुरुषस्य दौर्लभ्येन स्वस्य जातां व्यथां कथयन्नासीत् । स एव तयोः सल्लापः वसुमता श्रुतः ।

सरस्तीरान्निवृत्तो वसुमान् सङ्कुचद्गात्रः अन्तरीयस्य अञ्चलेन उरः पिदधानः गृहद्वारे तिष्ठन्, यः कोऽपि जनः किं बहिरागमिष्यतीति प्रतीक्षाञ्चक्रे। न कश्चिदाजगाम। अथ पार्श्वतो दृष्टिं प्रसारयन् अन्तर्गृहं चतुष्पद्यामुपविष्टं प्रसारितपादयुगलं पृष्ठतः साचीभूय अपाश्रये न्यस्तशिरसं उत्तानमुखं स्थितं रत्नकान्तं वातायनद्वारेण ददर्श। आत्यन्तिकी तस्य निश्चेष्टता तदीयां उत्कटां आर्तिं सुष्ठु व्यञ्जयामास। हस्तपादादिना कञ्चन शब्दमुत्पाद्य तच्चिन्तासन्तानविच्छेदं कर्तुं अजातधैर्यो वसुमान् तूष्णीमतिष्ठत्।

अथ स्नानाय पितरमाह्वातुमागता कोमला द्वारि तिष्ठन्तं वर्चस्विनं युवानं वसुमन्तं अपश्यत्। सोऽपि तां दृष्ट्वाऽनुपदं अवनतमूर्धा धरातलन्यस्तदृष्टिर्बभूव। झटिति गृहाभ्यन्तरं प्रत्याधाव्य कोमला मातरमवोचत्— "अम्ब! द्वारि यः कश्चिदागत्य तिष्ठति" इति।

माता— वत्से! कुतो नु मामुपेत्य इदं ब्रवीषि, न पितरम्? एवं मात्रा पृष्टा कोमला तदानीं मेने— "आम्। यदम्बा ब्रवीति तत्सत्यम्। पितुः सकाशमेत्य मया उक्तवत्या भवितव्यम्। न मातुः सकाशमेत्य" इति। परन्तु कुत एतद्विपरीताचरणमिति स्वात्मानमेव पृच्छन्ती सा तत्र हेतुं न बुबुधे।

ततस्तस्या जननी नाम्ना निरञ्जना द्वारदेशमागता वसुमन्तमपश्यत्। तस्मिन् किमपि गाम्भीर्यं, दैन्यं, इत्युभयं ददृशे। तेन सा तस्मिन् बहुमतिं चकार, अनुकम्पां च।

निरञ्जना— आर्य! को नु भवान्? को हेतुः इहागमनस्य? अवनतशिरा एव वसुमान् प्रत्युवाच—"वसुमान् नाम अहं अनाथः वृत्तिकामः। प्रभुं दिदृक्षे।"

अनुकम्पाविद्रुतचित्ता निरञ्जना त्वरितपदं गत्वा भर्तारं ध्यानात्प्रतिबोध्य उपांशु किञ्चिदुक्त्वा पुनरागत्य, "अत्र अन्तरास्ते प्रभुः। भवन्तं प्रतीक्षते। तत्र गन्तुमर्हत्यार्यः।" इति वसुमन्तमुक्त्वा व्यग्रा गृहाभ्यन्तरं प्रविवेश।

प्रीतिभरितया निरञ्जनाया वाचा जातप्रत्याशो वसुमान् अन्तः प्रविश्य रत्नकान्तमभ्यगच्छत्। 'आगन्तव्यम्' इत्युक्त्वा तं प्रतिगृह्य रत्नकान्तः आसनं निर्दिश्य 'उपविशतु भवान्' इत्यब्रवीत्। "महाप्रभुः स क्व, पैसारहितः स्वयं क्व। तत्सन्निधौ समाने आसने उपवेशनं स्वस्यानुचितं, पापिष्ठं कर्मे"ति बिभ्यत् लज्जमानश्च वसुमान् तिष्ठन्नेव अवर्तत।

अथ निर्बन्धादुपविष्टं रत्नकान्तः अब्रवीत्— वसुमानिति भवतो नामधेयम्?

वसुमान्— आम्।

रत्नकान्तः— मातरपितरौ न स्तः?

वसु— आम्। न स्तः।

रत्न— आदरकारिणो बन्धवोऽपि न सन्ति?

वसु— न सन्ति।

रत्न— वृत्तिमपेक्षते भवान्?

वसु— आम्।

रत्न— कच्चित् वणिग्वृत्तौ अस्ति भवतः परिचयः?

वसु— अस्ति। मम मातुलो वणिक्। तस्य गृहे चिरमहमवसम्। तस्य साहाय्यमाचरम्।

रत्न—केनापि कारणेन तस्य गृहं परित्यज्य बहिरागन्तव्यमासीत्?

वसु— आम्।

पूर्वेद्युः अनाहारक्लिष्टं तं पुनः प्रश्नान्तरैः आयासयितुमनिच्छन् रत्नकान्तः तं स्नानगृहं नीत्वा "इह स्नानीयं सर्वमस्ति। सुखं स्नातु भवान्" इत्यभिधाय तत्र विसृज्य स्वयं परावर्तत।

स्नाताय तस्मै अभिनवं धौतं वस्त्रयुगलं दत्त्वा धारयामास। अथ अवलोकनमात्रेण स्वदशां यथावद् ज्ञातवन्तौ तौ दम्पती इति अन्तर्विस्मयमानाय तत्कुलाचारसिद्धं पुण्ड्रं धृत्वा भगवन्तं प्रणतवते

तस्मै तावता कालेन सज्जीकृतं प्रातराशं निरञ्जना परिवेषयामास। सादरकृतैरेतैरुपचारैः सुप्रीतो वसुमान् श्लाघ्यगुणयोः अनयोः दम्पत्योः रूपेण स्वरक्षणे कृतसङ्कल्पो भगवानिति कृतज्ञतामेदुरमना अमन्यत। प्रक्षालितपाणिपादः रत्नकान्तसकाशं पुनरियाय।

रत्नकान्तः—परिश्रान्त इव भवान्; कञ्चित् कालं विश्राम्यतु।

वसुमान्— न न। सर्वथा न। प्रभोर्दर्शनमात्रेण हृष्टपुष्टं मे गात्रम्। स्नानादिभिः सुतराम्।

रत्न— अस्ति मे सहायापेक्षा। विश्वसनीयं समर्थं कञ्चित् गवेषयन्नासम्। दैवात् भवानुपस्थितः। इच्छायां अत्र स्थित्वा मम साहाय्यमाचरतु भवान्।

वसु— प्रभूणां कर्मकरा न दुर्लभाः। अहमहमिकां कृत्वा शताधिका आगमिष्यन्ति। अर्थो हि सर्वान् आकर्षति। किं तु अनन्यगतिकस्य ममायं परमोऽनुग्रहः प्रभुणा क्रियते। प्रभोर्नियोगं शिरसा धारयामि।

रत्न— सन्तोषः। निस्सङ्कोचं वदतु भवान्, वृत्त्यै मत्सकाशात् कियत् भवानपेक्षते।

वसु— प्रभो! नाहं किमप्यपेक्षे। देहयात्रा यदि चलति तावता तृप्तो भविष्यामि।

रत्न— किन्नु भवान् अस्मिन् अस्मद्गृह एव वासमिच्छति। अथवा अन्यत्र क्वचित्?

वसु— सर्वेषु विषयेषु प्रभोरत्यन्तपरतन्त्रोऽहम्। यद् यथा कर्तव्यं प्रभुरादिशति तत् तथा यथाशक्ति यथामति सश्रद्धं सादरं करिष्यामि। स्वतो मे नास्ति क्वचिदपि इच्छा अनिच्छा वा।

एभिः वसुमतः प्रतिवचनैरतिमात्रं हृष्टो रत्नकान्तः स्वयमाविर्भवन्ति हर्षचिह्नानि यत्नात् नियम्य "भवतु। सर्वं क्रमेण पर्यालोच्य निर्धारयेम" इत्यभिधाय तेन सार्कं आपणं गत्वा "इदं कर्तव्यम्। इत्थं कर्तव्यम्" इति विवृत्योक्त्वा तं तत्रैव त्यक्त्वा गृहमाजगाम।

முன் சொல்லிய அன்பு கருணை முதலிய குணங்கள் இல்லையேயாகிலும், பிறருக்கு வெறுப்பைத் தான் உண்டுபண்ணுமலும் பிறரால் வெறுக்கப் பெருதவனும் பிறர் பக்கல் சிற்சில காரணங்களை முன்னிட்டு ப்ரீதியும், கோபமும், பயமும், வெறுப்புமில்லாதவனுமான கர்மயோகநிஷ்டனும் எனக்கு ப்ரியமானவன்.

४८४ अनपेक्षश्शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तस्स मे प्रियः ॥ १६ ॥

आत्ममात्रापेक्षत्वेन शास्त्रीयमात्रजागरूकत्वं तद्व्यतिरिक्तेष्वत्यन्तनिरीहत्वं चाह– अनपेक्षः– अपेक्षा– आत्मव्यतिरिक्ते वस्तुनि स्पृहा यस्य नास्ति सः अनपेक्षः, शुचिः-शुद्धिहेतुभूतशास्त्रीयद्रव्यवर्धितशरीरः, दक्षः– शास्त्रीयकर्मानुष्ठानसमर्थः, उदासीनः– विहितव्यतिरिक्तेषूपेक्षकः, गतव्यथः– शास्त्रीयकर्मानुष्ठाने शीतोष्णपरुषाद्यवर्जनीयदुःखेषु चित्तविकाररहितः, सर्वारम्भपरित्यागी– आरभ्यन्त इति आरम्भाः– शास्त्रीयव्यतिरिक्तकर्माणि, सर्वाणि परित्यक्तुं शीलं अस्येति सर्वारम्भपरित्यागी, यः एवंभूतः, मद्भक्तः– मयि भक्तिमान्, सः मे प्रियः ।

ஆத்மாவைத் தவிர்த்து மற்றதில் ஆசையற்று, ஸாத்விகாஹாரத்தினுல் சுத்தி பெற்ற சரீரத்துடன் வைதிகதர்மாநுஷ்டானஸமர்த்தனுய், மற்றதில் உபேக்ஷையுடையனுய் கர்மாநுஷ்டானத்தில் விலக்கமுடியாமலேற்படும் துக்கங்களினுல் கஷ்டமற்று அசாஸ்த்ரீயங்களைப் புத்திபூர்வமாக விலக்கி என் பக்கல் பக்தியோடு கர்மயோகமநுஷ்டிப்பவன் எனக்கு அன்பனுகிருன்.

४८५ यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान् यस्स मे प्रियः ॥ १७ ॥

अथ दैवादागतेष्वपि प्रियाप्रियेषु शोकहर्षाद्यभावोऽनागतेषु निषिद्धव्यतिरिक्तेष्वपि वाञ्छारहितत्वं तत्कारणत्यागश्चोच्यते– 'हर्षामर्ष' इत्यनेन पूर्वं पुरुषविशेषनिमित्तं हर्षादिकं निषिद्धम्; इह त्वर्थलाभादिनिमित्तमिति विशेषः । यः– कर्मयोगी, न हृष्यति– अर्थलाभादिहर्षनिमित्तं प्राप्य न सन्तुष्यति, न द्वेष्टि– अप्रियं प्राप्य न द्वेषं करोति,

न शोचति— भार्यादिवियोगं प्राप्य न दुःख्यति, न काङ्क्षति— यद्विनाशे दुःखं स्यात् तथाविधं अप्राप्तं न किमपि वाञ्छति, शुभाशुभपरित्यागी— शुभाशुभे कर्मणी परित्यक्तुं शीलं अस्य इति शुभाशुभपरित्यागी । पापवत् पुण्यस्यापि स्वर्गादिहेतोः बन्धकत्वाविशेषात् तदुभयपरित्यागशीलः, यः— एवंभूतः, भक्तिमान् भक्तिपूर्वकं कर्म कुर्वाणः सः मे प्रियः ।

தனலாபம் முதலியவற்றால் ஸந்தோஷமற்றவனும் அநிஷ்டங்கள் வருகையில் த்வேஷமில்லாதவனும், புத்ரமரணாதி காரணங்களால் கலக்கமற்றவனும் து:கஹேதுவாகையால் புத்ராதிகளை அடையவேணுமென்று விருப்பமில்லாதவனும் பாபங்களைப்போல் ஸ்வர்க்காதிகளைக் கொடுக்கக்கூடிய புண்ய கர்மாக்களையும் விலக்கும் தன்மையுள்ளவனும் யாவனொருவனோ, பக்தியுடையனான அந்த கர்மயோகநிஷ்டன் எனக்கு அன்பனாவான்.

४८६ समश्शत्रौ च मित्रे च तथा मानावमानयोः ।
शीतोष्णसुखदुःखेषु समस्सङ्गविवर्जितः ॥ १८ ॥

४८७ तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।
अनिकेतस्स्थिरमतिर्भक्तिमान् मे प्रियो नरः ॥ १९ ॥

'अद्वेष्टा सर्वभूतानां' इत्यादिना शत्रुमित्रादिषु द्वेषादिरहितत्वमुक्तम्; अत्र तेषु सन्निहितेष्वपि समचित्तत्वं ततोऽप्यतिरिक्तो विशेष उच्यते— शत्रौ च, मित्रे च, समः— तयोरसन्निहितयोरपि निर्विकारतया तुल्यः, तथा शत्रुमित्रवत्, मानावमानयोः— पूजापरिभवयोः, समः— फलभूतानुरागामर्षादिरहितत्वात् तुल्यः, शीतोष्णसुखदुःखेषु— शीतोष्णयोः सुखदुःखयोश्च, समः— क्वचिदपि सङ्गवर्जितत्वात् तुल्यः, सङ्गवर्जितः, सर्वत्र निस्पृहः, तुल्यनिन्दास्तुतिः— तुल्ये निन्दास्तुती यस्य सः फलभूतामर्षहर्षयोरभावात् तयोस्तुल्यः, मौनी— निन्दास्तोत्रप्रतिक्षेपशीलः, येन केनचित् सन्तुष्टः— यदृच्छयागतैः यत्किञ्चित् द्रव्यैस्सन्तुष्टः इदं पूर्वोक्तमौनित्वे हेतुकथनपरम्; अतः 'सन्तुष्टस्सततं योगी' इति पूर्वोक्तेन न पुनरुक्तिः । अनिकेतः— गृहादिष्वसक्तः, स्थिरमतिः— आत्मन्येव निश्चलबुद्धिः, यः एवंभूतः भक्तिमान्, नरः सः मे प्रियः ॥

யாதொன்றிலும் பற்றற்றவனாகையால் சத்ருமித்ரர்களிலும், பூஜை பரிபவங்களிலும் சீதோஷ்ணம் ஸுகம் து:கமிவற்றிலும், நிந்தை ஸ்தோத்ரங்களிலும் துல்யனாய், நிந்தா ஸ்தோத்ரங்களை விலக்குந்தன்மையனாய், நேர்ந்ததைக்கொண்டு ஸந்தோஷமுடையனாய் க்ருஹ க்ஷேத்ராதிகளிலும் ஆசையற்று உறுதியுடன் பக்தியோடு கர்மாவைச் செய்கிறான். அவன் எனக்கு ப்ரியமானவன்.

४८८ ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥ २० ॥

इति श्री भगवद्गीतासूपनिषत्सु परब्रह्मविद्यायां योगशास्त्रे
श्री कृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशोऽध्यायः ।

॥ श्री कृष्णाय परब्रह्मणे नमः ॥

अध्यायोपक्रमे प्रश्नपूर्वकं भक्तियोगनिष्ठस्य अक्षरनिष्ठात् श्रैष्ठ्यं ह्युक्तम्; भक्तियोगाशक्तिप्रसङ्गेन अक्षरयोगस्य परंपरया भक्तियोगसाधनत्वं तदपेक्षितगुणाश्चोक्ताः; अथाध्यायारम्भगतप्रश्नस्योत्तरं निगमयति— 'मय्यावेश्य मनो ये मां' इत्युपक्रमश्लोकोऽयं चैकार्थः । तत्र 'नित्ययुक्ताः' इत्युक्त एवार्थोऽत्र 'मत्परमाः' इत्युच्यते । तत्र 'श्रद्धया परयोपेताः' इत्युक्तम्; अत्र तु 'श्रद्दधानाः' इति । तत्र 'ते मे युक्ततमा मताः' इत्युक्तम् । अत्र तु तत्फलित्वेन 'भक्तास्तेऽतीव मे प्रियाः' इत्युच्यते । अतस्स एवार्थोऽत्रोपसंह्रियते । इदं भक्तियोगरूपं धर्म्यामृतम्- धर्मात् अनपेतं धर्म्यम् धर्म्यं च तत् अमृतं च धर्म्यामृतम्—धर्म्य—प्रापकम्.अमृत—अमृतवद्भोग्यम्, प्राप्यसमं प्रापकम्, यथोक्तम्— 'मय्यावेश्य मनो ये माम्' इत्यादिनोक्तप्रकारेण ये तु भक्ताः —भक्तियोगनिष्ठा अधिकारिणः, श्रद्दधानाः— श्रद्धान्विताः, मत्परमाः– अहं परमो येषां ते मत्परमास्सन्तः, पर्युपासते—अनुतिष्ठन्ति, ते भक्ताः, अतीव—अतितराम्, मे प्रियाः प्रीतिविषया भवन्ति ।

॥ इति श्री गीतार्थदीपे द्वादशोऽध्यायः ॥

॥ द्वितीयषट्कं समाप्तम् ॥

இவ்வத்யாயாரம்பத்தில் ஜ்ஞாநயோகத்திலும் பக்தி யோகம் சிறந்ததென்று சொல்லப்பட்டதன்றே. அந்த பக்தி யோகமானது மோக்ஷத்திற்கு உபாயமாயிருப்பதோடு மோக்ஷம் போலவே போக்யமுமான ஸாத்யோபாயம். இதை ச்ரத்தை யுடனும் ஸித்தமான ப்ராப்யமும் ப்ராபகமும் பகவானே என்கிற எண்ணத்துடனும் எவர்கள் அநுஷ்டானம் செய்கின்றார்களோ அவர்கள் எனக்கு மிகவும் ப்ரியமானவர்கள். ஆதலால் ஆத்ம நிஷ்டரிலும் பக்தியோகநிஷ்டர்களே சிறந்தவர்கள்.

ஸ்ரீ கீதார்த்ததீபத்தில் பன்னிரண்டாம் அத்யாயம் முற்றிற்று.

இரண்டாவதுஷ்ட்கம் ஸம்பூர்ணம்.

*yogas* were opposed to each other and so one could not be the means of another. *Karma* requires almost every organ to be seriously engaged in their respective field but *jnana* on the contrary requires all outer organs to be kept utterly inactive and detached. Could there be any cause-and-effect relationship between the two? So he asked Krishna why he advised him to take to *karma* rather than *jnana*, which latter, as the object to be achieved, is superior to the former which is only the means helping to achieve it. Answering this question of Arjuna Krishna explains the necessity of resorting to *karma* in preference to *jnana* in the third *adhyaya*.

In the case of one that cannot take up *jnana-yoga* at once there is no doubt that that one should practise only *karma-yoga*. It is said here that even in the case of such one as is fit for *jnana-yoga*, it is better to practise, with no idea of enjoying its fruits, *karma* instead of *jnana*; because otherwise *i. e.*, if he practises *jnana*, following his example ignorant people, who naturally do what men of higher status do, also would resort to *jnana* even though they are not fit for it and fail and suffer. Thus, in order to save the world, that is, common people from such danger, men of knowledge and ability, though quite fit for *jnana*, should practise only *karma-yoga*. They will be committing a sin if they practise *jnana-yoga* because they mislead the world and so injure themselves.

The fear that *karma*, action, done in any way, will result in bondage or strengthen it, is baseless. It loses entirely its binding capacity when done with absolute detachment in respect of the fruits it would yield. Another factor which would strip it of this capacity is the transference or ascription of the agency (*kartrtva*) to the three qualities, *sattva*, *rajas*, and *tamas* pertaining to Nature or

Prakrti in the form of body, and also to God who controls our nature, our existence and our movements and every thing else. And there is not any oppositeness between *karma* and *jnana* as Arjuna thought there was, because *karma* leads to *jnana* not directly but as has been already explained only through His grace.

Thus, those important topics of the third chapter of the *Gita* which are mentioned in the concerned *sangraha sloka*, have been explained. But there are some other points dealt with in this chapter which are of much, if not equal, importance, and so require to be considered here. Krishna points out to Arjuna that *karma* being already familiar and usual is safer and easier of practice than *jnana*.

Further even a *jnana yogin* cannot afford to abandon *karma* completely. There is no use starting the *jnana yoga* and abandon it, after practising it for a while. Once one begins to practise it, one should continue it till one realises its object, *i. e.*, till one gains soul-experience. If so, the *yogin* must live long; he should take every care of his body; he should nourish it properly, that is, in the manner in which the mind would be kept pure enough to continue the *yoga* up to its fructification. And the means of doing this is to take only food which is the remnant of *yagna*, sacrificial offering to gods. The value and importance of *yagna* must be well understood. Krishna tells Arjuna that the creator created men together with *yagnas* and said to them "Prosper with this. This will yield all that you want." *Yagna*, performed, will bring about all good and prosperity but, neglected, will make us all sinners. It is the gods that give food to men. If then, men cook and eat food without offering it to gods, they become thieves.

There is another aspect of *yagna*. Every living being is dependent on *yagna*. There is a cycle set in motion by the

Creator. Every man in the world must play his part in seeing that it keeps on moving. Any failure to do so on any body's part will render his very life sinful. The cycle is as follows:—Beings are brought about by food; food by rain, rain by *yagna*; *yagna* by *karma*, *karma* by beings, *i. e.*, body indwelt by jiva and these beings again by food. Without *karma*, there could be no *yagna*; without *yagna*, there could be no rain; without rain, there could be no food; without food there could be no beings. Action, *karma*, is therefore absolutely necessary. When a man becomes a *mukta*, one free from bondage, *samsara*, he is no more required to do any action. He is free from all obligations. Until that moment he is bound to do action pertaining to him.

Perhaps these points were covered by the term लोकरक्षार्थे in the stanza, though this was not clearly pointed out either in the Bhasya by Ramanuja or in the Tatparyachandrika by Desika.

At the end of the previous, *i.e.*, the second, chapter, Krishna explained in some detail difficulties attending the practice of *jnana-yoga*. He does the same again here in this third chapter. Krishna is clearly seen laying much emphasis on *karma-yoga* and deprecating *jnana-yoga*. This is not referred to in the stanza, since this is not directly related to the main topic of the chapter.

4 *a*. The next stanza refers to four subjects as dealt with in the fourth chapter, of which the first is Lord's incarnations.

In order to make Arjuna believe in all that he said about *karma-yoga*, Krishna tells him that He taught this *karma-yoga* to Vivasvan, and Vivasvan to Manu and Manu to Ikshvaku: thus being transmitted from generation to

Registered No M 2300.

Book XXXIII || श्रीः || No. 5-6

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

:o:

ये संस्कृतप्रियाः सन्तस्तेषां सद्मानिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३३] कलि ५०६१ शार्वरी मकर-कुम्भौ [सं ५-६

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

JANUARY & FEBRUARY 1961.

In case you have not received the previous number please inform the Editor or Publisher immediately.

पत्रिकामूल्यं निश्शेषं प्रेष्य उपकर्तव्यम् ।

**Kindly help the poor journal by sending the arrears of your subcription**

For the rate of subscription please see inside.

# UDYANA PATRIKA.

Annual Subscription: Rs. Three only.
Foreign Twelve Indian Rupees.

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं त्रीणि रूप्याणि ।

२ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

३ वर्षमध्ये ग्राहकीभवतामपि कन्यासङ्क्रिकादिरेव पत्रिका प्रेष्येत ।

४ एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

५ प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

६ एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

७ लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः *Mimamsarnava Mimamsakesari, Panditaraja* D. T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयाः ॥

1. शारदास्तुतिः ।
2. श्रीकमलाप्रपत्तिपञ्चाशत् ।
3. हितं प्रतारणम् ।
4. मुकुन्दमाला ।
5. रामराज्यम् ।
6. वसुमान् ।
7. प्रकृतिभेदः ।
8. पुस्तकपरामर्शः ।

KENDRIYA SANSKRIT VIDYA TIRUPATI LIBRARY

कर्पूरपुञ्जधवलां कलिताङ्कवीणां
कीरानुकारिकलनिस्वनहारिणीं त्वाम् ।
पद्मासनां कमलसम्भवभाग्यलेखां
लेखाभिवन्दितपदाम्बुरुहामुपासे ॥ २६ ॥

मुक्ताफलान्नु मुकुरान्नु हिमालयान्नु
राकानिशो नु कलशीसरिदीशितुर्नु ।
चण्डीशहासमहसो नु चिदङ्कुरान्नु
निष्पादिता तव तनुः सृजता विधात्रा ॥ २७ ॥

उल्लासमेति नयनोत्पलमङ्गकान्ति-
ज्योत्स्नोपलालितमिति क्रमभाव्यमेतत् ।
यन्मन्दहाससितपद्ममहोत्सवोऽपि
तत्रैव विस्फुरति तत्पुनरद्भुतं नः ॥ २८ ॥

आरुण्यमम्ब तव निर्मलचन्द्रकान्त-
कान्तिप्रमोषिणि वपुष्यधरानुषक्तम् ।
व्यादीर्णदाडिमफलैकदलं विशङ्क्य
चापल्यमञ्चति शुकी मुहुरग्रहस्तात् ॥ २९ ॥

लीलाशुकीकलरवेष्वविभाव्यमान-
कण्ठां मृदुस्मितविशेषितदेहकान्तिम् ।
वीणावघृष्टकिणशालिकुचां विधातु-
रुत्सङ्गपूरणकलां हृदि भावयामि ॥ ३० ॥

धातुश्चतुर्वदनपङ्कजिनीमरालीं
दुःखाम्बुधिप्रसभलङ्घनसेतुलेखाम् ।
विज्ञाननिर्मलवियत्तटिनीमवैमि
त्वामम्ब चारुकविताफलकल्पवल्लीम् ॥ ३१ ॥

माभूत् पराभवपदं भुवि मां प्रपन्नो
दीनो जनोऽयमिति चेत् करुणालवस्ते ।
मातः खलद्विपसृणिं मसृणां प्रकृत्या
सन्मौलिमण्डनमणिं मम देहि वाचम् ॥ ३२ ॥

॥ इति श्रीशारदास्तुतिः ॥

॥ श्रीः ॥

# ॥ श्री कमलाप्रपत्तिपञ्चाशत् ॥

श्री महालिङ्गकविविरचितम् ।

चञ्चन्मिलिन्दमभिवृत्तमरालमीष-
दुन्निद्रपङ्कजमुदीर्णमनोज्ञशोभम् ।
बालार्कदीधितिसमिद्धतरङ्गभङ्गं
श्रीसद्म तज्जयति पद्मसरः प्रभाते ॥ १ ॥

उन्मीलदर्यमहस्यनुरज्यमाने
प्राचीमुखे वहति गन्धवहे मनोज्ञे ।
प्रत्यब्जमुत्प्रहसनक्रमतो नलिन्या-
माविष्कृतस्वसुषमां कमलां स्मरामि ॥ २ ॥

पार्श्वद्वयोपगतकुञ्जरपुष्कराग्र-
निर्धूतचामरमरुत्प्रचलालकान्ताम् ।
वन्दे श्रियं निजनिकेतनसौरभौघ-
श्लाघोदितस्मितमनोहरवक्त्रशोभाम् ॥ ३ ॥

उत्फुल्लपङ्कजनिभं वदनं तवाम्ब
वक्षोरुहौ च सरसीरुहकुड्मलाभौ ।
हस्तौ सरोजसुषमौ चरणौ तथैव
त्वां वीक्ष्य वारिजमयीं कमलां किमाहुः ॥ ४ ॥

मीनायताक्षि नवविद्रुमबन्धुरोष्ठि
मन्दस्मितामृतविसारिणि कम्बुकण्ठि।
शैवालनीलचलकुन्तलचारुशोभे
स्थाने त्वमम्ब खलु दुग्धपयोधिजाता ॥ ५ ॥

गात्रस्य कल्पलतिकामधरामृतस्य
पीयूषमिन्दुमपि कान्तिमतो मुखस्य।
त्वत्सौष्ठवस्य शतमप्सरसां च पूर्वं
किं मातृकामसृजदुन्मथितः पयोधिः ॥ ६ ॥

रत्नाकरस्य दुहितुस्तव भूषणाना-
मर्घे न कश्चिदपवादमिहोल्लिखामि।
मातर्विभाति मम किं तु तवाङ्गकान्त्या
भूष्यानि तानि न तु नामविभूषणानि ॥ ७ ॥

पङ्केरुहाक्षवरणत्वरमाणया स्वं
त्र्यक्षस्त्वया भृशमुपेक्षितमभ्यसूयन्।
हालाहलं द्रुतमपादिति तर्कयामि
विश्वस्य रक्षणमिति व्यपदेशमात्रम् ॥ ८ ॥

यस्ते प्रसन्ननयनान्तनिवेशपात्रं
लोकत्रयेऽपि पुरुषोत्तम एव सोऽभूत्।
यस्तावतो न सुकृती स कपालमाला-
चञ्चज्जटाविकटमूर्तिरथाट भिक्षाम् ॥ ९ ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेध खेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु ३३] कलि ५०६२ शार्वरी-मकर-कुम्भौ [सं ५-६
(1961–January–February)


## ॥ हितं प्रतारणम् ॥

पुत्रः— अम्ब ! अद्य मां प्रतारितवत्यसि ।

माता — अये ! अहं प्रतारितवत्यस्मि ! कथं तात प्रतारितवत्यस्मि ? ब्रूहि पश्यामि ।

पुत्रः— देवालयगमने न मे रुचिरासीत् । न गन्तव्यमिति मत्वा शयितुमगमम् । त्वं "पेटिका उद्घाटनीया । कुञ्चिका अग्रजे वर्तते । स देवालयं गतः । तत्र गत्वा तस्मात् तां गृहीत्वा आनय" इत्यादिश्य मां प्रैषिषः । तत्र गतं मां "दास्यामि तिष्ठ, दास्यामि तिष्ठ" इति वदन् सः चिरं तत्रावस्थाप्य देवदर्शनं कारयित्वा ततःपरमेव कुञ्चिकामदात् । एवं कुञ्चिकाव्याजेन देवदर्शनायैव मां देवमन्दिरं गमितवत्यसि ।

माता — वत्स, इमां ते अग्रजां पश्य । किमेषा करोति ?

पुत्रः— शिशुं कटथां कृत्वा अन्नं प्राशयति ।

माता— कथं प्राशयति, ब्रूहि ।

पुत्रः— "अयं चन्द्रमा भ्राजते, पश्य । कोऽन्वरे अयं उच्चैर्भषति? श्वा । पश्य, अयं श्वा समीपमागत्य लाङ्गूलं चलयति", इति तत्तद्वदन्ती प्राशयति ।

माता — किमिति तत् सर्वं वदति ? कुतः तूष्णीं न प्राशयति ?

पुत्रः— शिशुः अन्नं दीयमानं प्रतिषेधति, न भोक्तुमिच्छति । अन्ने मुखं प्रति नीयमाने मुखं परावर्तयति । अतः तस्य चित्तं अन्यत्र नेतुकामा तत्तद् वदति । ताभिर्वाग्भिः अन्यपरो भवन् शिशुः तया दीयमानं

कबलं मुखं विवृत्य स्वीकरोति, निगिरति। न प्रतिषेधति। एवमनिच्छन्तमपि, प्रतिषेधन्तमपि, प्राशयितुकामा किमपि किमपि वक्ति।

माता— साधु। अथ ब्रूहि, सा किं शिशुं प्रतारयति उत न?

पुत्रः— (आलोच्य) अस्ति तत्र प्रतारणम्। किन्तु हितं, अत एव न्याय्यं तत्प्रतारणम्। अन्यथा हि शिशुः क्षुधा पीडितो भवेत्।

माता— बुद्धिमानसि त्वम्। सम्यक् भाषसे। तमेव न्यायं त्वद्विषयेऽपि योजयस्व।

पुत्रः— देवदर्शनं मे हितम्। तदहं नैच्छम्। तत् केन चिद् व्याजेन मां देवालयं प्रेष्य कारितवत्यसि?

माता— आं वत्स, तथा।

# मुकुन्दमाला॥

श्रीनाथ नारायण वासुदेव
श्री कृष्ण भक्तप्रिय चक्रपाणे।
श्री पद्मनाभाच्युत कैटभारे
श्री राम पद्माक्ष हरे मुरारे॥ ३६॥

अनन्त वैकुण्ठ मुकुन्द कृष्ण
गोविन्द दामोदर माधवेति।
वक्तुं समर्थोऽपि न वक्ति कश्चि-
दहो जनानां व्यसनाभिमुख्यम्॥ ३७॥

पूजा पूर्वं प्रस्तुता। अहोरात्ररूपं एकं दिनं पञ्चधा विभज्य प्रथमे विभागे योगक्षेमसिद्ध्ये भगवतोऽभिगमनं महान्तः कुर्वन्ति। द्वितीये भगवत्पूजार्थं अपेक्षितानि यानि द्रव्याणि तदार्जनरूपं उपादानम्। तृतीये पूजा। तुरीयः स्वाध्यायकाल इत्युच्यते। अत्र भगवन्नामघटितमन्त्रजपः।

क्रियते। भगवन्नामसङ्कीर्तनमिदं भवति। स्वयमिदं कुर्वन्तो दयालवो महान्तः अन्यानपि कारयितुमिच्छन्ति। जनानाहूय इदं कर्तव्यमुपदिशन्ति। तस्य सर्वश्रेयोमूलत्वमुपपादयन्ति। जनास्तु इममुपदेशं न कर्णे कुर्वन्ति। अर्थकामयोरेव अभिनिविष्टा भवन्ति। यः कश्चिदेकोऽपि भगवन्नामसङ्कीर्तने न श्रद्धां करोति। इमां स्थितिं स्मरन् कुलशेखरः स्वकीयं शोकमाविष्कुर्वन्नाह— श्रीनाथेत्यादि।

नारायणेति नामास्ति वागस्ति वशवर्तिनी।

इत्युक्तरीत्या नामानि वक्तुं समर्थाः सर्वे जनाः। तेष्वेकोऽपि न वक्ति।

कुतो न वक्ति। व्यसनाभिमुख्यात्। क्षुद्रविषयेषु अतिप्रसङ्गः व्यसनमित्युच्यते। तत्र आभिमुख्यात् न कश्चन भगवन्नामानि वक्ति। अहो; इदं जनानां व्यसनाभिमुख्यं अत्यन्तं शोचनीयम्

कानि भगवन्नामानि? श्रीनाथेत्यादीनि "तत्त्वं ब्रुवाणानि परं परस्मान्मधु क्षरन्तीव सतां फलानि" इति पूर्वं वर्णितानि।

अत्र नाम्नां निर्देशे क्रमनियामकमेवमनुसन्धेयम्। श्रियःपतिर्नारायण एव वसुदेवपुत्रत्वेन प्रादुर्भूय श्री कृष्णो बभूव। सः अर्जुनप्रभृतीनां भक्तानां प्रियः, चक्रपाणिः सन् द्वेषिणां शिशुपालादीनां हन्ता चाभवत्।

स्वनाभिकमलात् ब्रह्माणमुत्पाद्य तन्मुखेन जगत्सृष्टिं करोति। सृष्टे जगति स्वाश्रितान् कदाऽपि न च्यावयति। भगवच्चरणारविन्दाश्रयाः कदापि न च्यवन्ते, न नश्यन्ति; यस्मात् स साधुजनहिंसाकारिणः कैटभं तत्सदृशान् अन्यांश्च निहन्ति। श्री रामो भूत्वा हि रावणप्रभृतीन् अवधीत। राजीवलोचनः सन् भक्तान् शिशिरैः कटाक्षैः वीक्षते। तेन तेषां पापानि हरति॥ एवमनुगृहीता महर्षयः स्तुवन्ति— "मुरारे अनन्त वैकुण्ठ मुकुन्द" इति। पूर्वं मुरासुरमवधीः। अद्येमान् राक्षसान्। त्वं साक्षात् त्रिविधपरिच्छेदरहितः वैकुण्ठलोकवर्ती मोक्षप्रदः परमपुरुषः।"

रामावतारानन्तरं कृष्णरूपेण भूमिमागच्छति। गवां बहुधा परित्राणात् गोविन्द इति प्रथां लभते। यथा माता दाम्ना उदरे बध्नाति तथा तस्या वश्यो भवन् परमं वात्सल्यं दर्शयति। तस्यामप्यवस्थायां माधव एव सः श्रियःपतिः सर्वेश्वर एवेति।

# रामराज्यम् ॥

(उत्तमस्य राज्यस्योत्तमो राजा)

वि. वि. श्री.

(द्वितीयाङ्कप्रथमप्रेक्षणकानुवृत्तिः)

वसिष्ठः— न मे तत्र सन्देहः। राष्ट्रस्य प्रजानां च युवाभ्यां समग्रा रक्षा भवतीत्यहं जानामि। तत्रभवतो भवत्पितुर्जीवनकाल एव मयाऽधिष्ठितात् अस्मात् पुरोधःपदात सचिवपदाच्च निवृत्तिं चिन्तयन् आसम्। अथापि भवतः पितरि झटिति मृते,युवयोरुभयोः वनं गतयोः, भरते च राज्यं निराकृतवति, अनाथाः प्रजाः, अराजकं राष्ट्रं च न परित्यक्तव्यमिति मे मतिरभूत। अद्य सर्वं साधु वृत्तम्। सर्वं शोभनपर्यवसानम्। युवयोरुभयोरपि अहं पट्टाभिषेकमकार्षम्। यद्यपि पूर्वं कदाचिदपि उभयोरभिषेचनं वृत्तं न श्रूयते तथापि इदम्प्रथममेव एतदहमकरवम्, यतः स्त्रिया समन्वितस्यैव पुंसः पूर्णता भवतीति मे दृढः प्रत्ययः।

सीता— भगवन्! यदा भवान् अभिषेकदिने आवामुभावपि सिंहासने न्यवेशयत् तदा इदं सर्वं मया न चिन्तितमासीत्। आशीर्भिर्वर्धनाय केवलं तदिति मन्यमाना अभवम्।

रामः— नैवं, प्रिये जानकि! तदा भगवान् यदमन्यत तन्मे किञ्चित् स्फुरति स्म। तन्न वृथेति मया ज्ञातं गृहीतं च। योऽहमस्मि तं मां त्वमकरोः। त्वां विना कोऽहम्? प्रभां विना कः सूर्यः?

(द्वारमपाव्रियते। द्वारपालः प्रविशति।)

द्वारपालः— (वसिष्ठं रामं सीतां च प्रणम्य) महाराज! सचिवोत्तमः सुमन्त्र उपस्थितः। द्वारे तिष्ठति। अन्तरागमनाय अनुमतिं प्रार्थयते।

रामः— किमन्यत्। सर्वदा स युक्ते काले आगच्छति। (द्वारपालं प्रति) ब्रूहि तं अन्तरागन्तव्यमिति।

(द्वारपालो निष्क्रामति)

रामः—(वसिष्ठं प्रति) स नूनं अस्मत्कुलस्य अपरः पक्षः (लौकिकः पक्षः)

(सुमन्त्रः प्रविशति। दण्डप्रणामैः वसिष्ठं, अञ्जलिना रामं सीतां च प्रणमति च)

रामः— अस्मत्सचिवोत्तम, भवदायुष्काले सर्वदा भवान् युक्ते काले युक्ते देशे आगच्छति। तत् कथमिति कच्चिन्मे ज्ञातुं शक्यम्?

सुमन्त्रः— स सचिवपदमर्हति, यः सर्वतश्चक्षुः सर्वतश्श्रोत्रो भवति।
रामः— मन्ये न सर्ववाचालः।
सुमन्त्रः— न, महाराज। यो भाषते न स कर्म करोति।
वसिष्ठः— यश्च कर्म करोति तस्य भाषणमनपेक्षितम्।
रामः— अस्मत्सचिवसत्तम, भगवान् वसिष्ठः अधिपर्वतं स्वकीयमाश्रमं प्रतियातुमिच्छन् अस्मान् आप्रष्टुकामः इहेदानीं सन्निहितः।
सुमन्त्रः— इयं शङ्का मे अजनि, महाराज। अतोऽस्मि त्वरितपदमत्र आगतः।
वसिष्ठः— सचिवोत्तम, भवान् अहं च इयन्तं कालं रघुकुलराजसन्ततिं सभक्तिश्रद्धं पर्यचराम। भवानिदं ब्रवीतु अस्मिन् अपरवयसि किं मया तपसे न प्रतिगन्तव्यम्।
सुमन्त्रः— मामपि सह नेतुमर्हति भगवान्।
वसिष्ठः— न भवान् तापसः। इदं भवतस्तपः यत् श्रीरामचन्द्रस्य सन्निधौ स्थित्वा यथावत् अमात्यकर्मनिर्वर्तनम्।
सुमन्त्रः— भगवन्, प्रबलोऽपि महाराजपक्षी कथमेकेन पक्षेण पतितुं शक्नुयात्?
रामः— सम्यगुक्तं, सुमन्त्र। एकेन वाक्येन (विनोद) निर्णयोऽयं कृतो भाति। अतो भवान् अन्वर्थः सुमन्त्रः। किमिदं भवतो नाम भवत्पितृभ्यां कृतं, अथवाऽस्मत्पूर्वपुरुषैः, इति विमृशन् विस्मयमानोऽस्मि।
सुमन्त्रः— उभयैरपि, कुतो न महाराज।
रामः–कामं तथा। वैयक्तिकं नामधेयमेतत्। अन्वर्थं वैयक्तिकनामधेयम्।
सीता— पुरुषनाम्नां देशनाम्नामपि च प्रवृत्तौ अस्ति काचित् गूढा नियतिरिति मे सर्वदा मतिः। किमपि पूर्वावधारणं तत्। भवन्नाम्न एव तत्त्वं विमृशतु भवान्, प्रभो।
वसिष्ठः—(सस्मितं) सीते, परमार्थं भवती भाषितवती। अत्र आगमनसमये तपोवनगमनात् प्राक् युष्मान् सर्वान् दृष्ट्वा निवेद्य गन्तव्यमिति अध्यवसायवान् आसम्। श्रीरामे दृष्टे सम्भाषिते च सोऽध्यवसायः विलयमगात्, हिममिव सूर्यकिरणैः।
सुमन्त्रः— भगवन्, इदं मे प्रष्टव्यं भवति–लोकहिताय आत्मसमर्पणादतिरिक्तं तपः किं किञ्चिदस्ति? किं वा श्रीराघवस्मितज्योत्स्नायां सञ्चरणादधिकं सुखं स्वर्गेऽपि भवितुमर्हति?

वसिष्ठः—(क्षणं चिन्तयन्, अथासनादुत्तिष्ठंश्च) सुमन्त्र, अत्र अन्तः प्रविशन्नहं द्विमतिरभूवम्। अन्तर्मे युद्धं किमप्यभूत्। ततो मे निष्क्रमणे यथाशीलं भवान् साहाय्यमकार्षीः। कथमहं रामं परित्यज्य गच्छेयम्? मूढः किल सः, यः आत्मना संरोपिते वृक्षे पुष्पिते सति फलोद्गमपर्यन्तं अनवतिष्ठमानः तं परित्यजति। श्रीरामचन्द्र, इदं मे खेदाय भवति, यदद्य प्रातः सहसा कृतं ममाध्यवसायं निवेद्य भवतो मनसः शान्तिभङ्गं अकार्षम्। न, नैवाहं गमिष्यामि। अयोध्यातो बहिः तदा अहं गमिष्यामि, यदा त्वं सीतया सह गमिष्यति। (निष्क्रामति। रामः सीता सुमन्त्रश्च कानिचित् पदानि तमनुव्रज्य तिष्ठन्ति)

सीता— सुप्रभातमेतत् यत्र अल्पेन यत्नेन इदं सुमहत् कार्यं साधितम्।

रामः— सर्वमिदं अस्मत्सचिवोत्तमायत्तसिद्धिकम्।

(यवनिका)

# ॥ वसुमान्-3 ॥

वसुमान् क्रेतृषु विक्रेतृषु च सर्वदा सुमुखो बभूव। सर्वदा मृदु अभाषत। तं कुपितं परुषभाषिणं वा यः कोऽपि यदा कदाचिदपि नापश्यत्।

क्रयविक्रयव्यवहारे परमऋजुरासीत्। क्रयावसरे न अधिकं जग्राह। विक्रयावसरे न न्यूनं ददौ। पण्यवस्तूनां सर्वेषां मानं क्रये विक्रये वा यथावच्चकार।

कर्तव्यं सर्वं क्षिप्रं चकार। तत्समीपं गतस्य यस्य कस्यापि क्रेतुः विक्रेतुर्वा चिरप्रतीक्षा नैव जातु कर्तव्या बभूव।

क्रयिविक्रयिणः पण्यं प्रति, वस्तूनां मूल्यं प्रति च बहून् प्रश्नान् कुर्युः। पृष्टमेव प्रश्नं पुनः पृच्छेयुः। तत्र सर्वत्र क्षमां अपरित्यज्य हसन्मुखः शान्तं उत्तरं ददौ।

एवं वर्तमानस्य तस्य गुणाः अचिरेणैव कालेन नगरे सर्वत्र प्रथिता बभूवुः। तेन तस्यापणे व्यवहारिणां जनानां संख्या दिने दिने अवर्धत। तत्फलतया लाभश्च।

सायं क्रयविक्रयकर्मसमाप्तौ गणितं सर्वं अनाकुलरमणीयं विशद-विशुद्धं विलिख्य वित्तभस्त्रिकया सह गृहं नीत्वा स्वामिनः सकाशे निदधौ। तद्वीक्ष्य रत्नपालेन यदि प्रश्नाः कृताः तेषां सुसमुचितमुत्तरं दत्वा सन्तुष्टेन तेनानुमतः पाणिपादं प्रक्षाल्य सन्ध्यामुपास्य निरञ्जना यत्र अवर्तत तत्र गत्वा तत्तत्कर्म कुर्वत्याः तस्याः साहाय्यं कर्तुं प्रावर्तत। तया प्रतिषिद्धोऽपि विप्रकीर्णानि वस्तूनि तत्तत्स्थाने निदधौ। आर्द्रवस्त्राणि स्थितानि चेत् तानि निष्पीड्य विधूय यष्टिषु शोषयामास। शुष्काणि वासांसि सम्यक् वलयित्वा निदधौ। जल-पात्राणि दृष्ट्वा तानि रिक्तानि चेत् कूपात् जलमाकृष्य पूरयामास। कर्तव्यविरहे तत्तत्समयोचितं किमपि किमपि भाषमाणः निरञ्ज-नाया मनो विनोदयामास।

रत्नपालेन साकं, तस्मिन् भुक्तवति वा, भुक्त्वा शयनकाले निरञ्जनायै निवेद्य स्वशय्यागृहं गतः वार्तापत्रिकां पुस्तकं वा किमपि कञ्चित्कालं पठित्वा निद्रागमे शयितः सुप्त्वा महति प्रत्यूषे बुबुधे। अनलसः सपदि त्यक्तशय्यः प्रातःकालकर्तव्यं सर्वं निर्वर्त्य, सज्जीभूते प्रातराशे तमुपभुज्य, अन्यथा तन्निरपेक्ष एव कुञ्चिकां आदाय आपणं ययौ। मध्याह्ने गृहमागत्य भुक्त्वा अनतिविलम्बेनैव पुनरापणं ययौ।

इत्थं न परं वाणिज्यकर्मणि गृहकर्मण्यपि महतीं श्रद्धां परम-मुत्साहं च बिभ्रति वसुमति, वीतसर्वभरः निश्चिन्तश्च रत्नपालः क्रमेण सुखवासरसानुभवं लब्ध्वा मुमुदे।

अथ चिरात् समयं प्रतीक्ष्य स्थिता निरञ्जना पुत्र्या ललितायाः परिणयमधिकृत्य भर्तरि शनैः प्रस्तावमकरोत् । परिणयार्हं वयः प्राप्तायास्तस्याः द्वित्राणि वर्षाण्यभवन् । निरञ्जनाया भिन्नोदरभ्रातृपुत्रः शुभाङ्गो नाम अवर्तत । रत्नपालस्य भागिनेयश्च सुपर्णः । एतयोरन्यतरस्मै सा देयेति पित्रोरुभयोरभिप्रायः । परन्तु सुपर्णः कृशः सर्वदा रुग्ण इव दृश्यमानः ललिताया मनसे न रुरुचे । शुभाङ्गं प्रति तु पित्रोः अरुचिरजायत ।

शुभाङ्गस्य पितरौ यद्यप्याढ्यौ तथापि अर्थतृष्णाबहुलौ । रत्नपालस्य ललिता एका पुत्री । नान्यः पुत्रः पुत्री वा । स्वं तु अनल्पम् । सर्वं तत् स्वं सद्य एव शुभाङ्गस्य शासनपूर्वं दातव्यम् । तथा कृत एव ललिता शुभाङ्गं परिणेतुमर्हतीति अस्य पितरौ अभिनिवेशं प्रादर्शयताम् ।

तेन निरञ्जनारत्नपालयोः महद्वैमनस्यं उदभूत् । "आवयोरनन्तरं अस्मदीयं सर्वस्वं तमेव प्राप्स्यति । इदानीमेव शासनपूर्वं देयमिति केयं मतिः, कोऽयं निर्बन्धः ? किं आवाभ्यां इतः प्रभृति परकीयस्वेनैव जीवद्भ्यां भवितव्यम् ? किमिदानीं दरिद्रः शुभाङ्गः जीवनाय सद्यः किञ्चिदपेक्षी ? धिक् अस्थानविजृम्भितां अमर्यादां अर्थाशाम्" इति बहु जुगुप्समानौ शुभाङ्गाय नैव देया ललितेति निरचिनुताम् ।

"यः कोऽपि हि अन्यो वरोऽन्विष्य निश्चेतव्यः । कियच्चिरं तूष्णीं वर्तितुं शक्यम् । वयो ह्यस्या अतिक्रामति । इतोऽपि परं कालातिपाते नूनमस्माकं वाच्यता भवेत् ।" इति निरञ्जना भर्तारमवोचत् ।

"सत्यं तथा यथा त्वं वदसि। परं तु किमहं करवाणि? कस्य पुत्रिणः सकाशं गत्वा दन्तान् दर्शयेयम्? किञ्चिदपेक्ष्य गत्वा कश्चित् द्रष्टव्य इति प्रसङ्गे सति ममान्तरात्मा अवसीदति, प्राणा उत्क्रामन्ति ..............."
इत्युक्तवति अनवसितवचन एव भर्तरि आकुला निरञ्जना "मा तावत्। प्रतिहतममङ्गलम्। कथं कल्याणप्रस्तावे इमा वाचः आर्यपुत्रस्य मुखान्निर्गन्तुमर्हन्ति?" इति प्रतिबोधनमकरोत्।

रत्नपालः पुनरवदत्— "कल्याणिनी भवतु वत्सा। नूनमेषा महाभाग्यवती भविष्यति। न तत्र मनागपि संशयः। किन्तु वरहेतोः कस्यचिदुपसर्पणे मम यः क्लेशः तमिदानीं ते ज्ञापयितुं प्रवृत्तोऽस्मि।

निरञ्जना— आर्यपुत्रेण अनुक्तमपि तमहं जानाम्येव। अथापि किं क्रियताम्। कन्या हि जाता कस्मैचिद्देया। उचितं वरमन्विष्य आनेतुं कोऽन्य आप्तजनोऽस्माकमस्ति? कलिरिदानीं प्रौढिं गच्छति। निस्स्नेहा निर्दयाः स्वार्थैकप्रवणा जनाः। बन्धवोऽपि अबन्धुभ्यो निर्विशेषाः वित्तहरणमात्रलक्ष्या भवन्ति। स्वप्रवृत्तिं विना किमस्माकं सेत्स्यति?

रत्नपालः— यदा यदा नः किमपि सङ्कटं भवति तदा तदा परमकारुणिको भगवान् कमपि पन्थानं दर्शयति। नूनमस्मिन्नपि विषये सोऽस्माकमनुग्रहं करिष्यति। पश्य कस्तत्र त्वरित आगच्छति?

इति वदत्येव रत्नपाले अतर्कितं वसुमान् गृहस्यान्तः प्रविश्य प्रभुमुपगम्य "गुडशकटा आगताः सन्ति। उत्तमं गुडम्। सहस्रा-

धिकानि रूप्याणि मूल्यं भवन्ति । आपणे तावद् धनं नास्ति । इतः सहस्रं नेयम् । तदर्थमागतोऽस्मि " इति निवेदयामास । रत्नपालानुमत्या तावद्धनं गृहीत्वा जगाम च ।

अतर्कितेनानेन वृत्तेन यथा रत्नपालस्य तथा निरञ्जनाया अपि मनसि किञ्चिदभात् । उभौ परस्परं वीक्ष्य स्मितमकुरुताम् । तस्मिन् क्षणे तत्रागता ललिता तयोः सम्भाषणानुवृत्ते विच्छेदमकरोत् । अथापि उभयोरपि मनसि एक एवाभिप्राय उदित इति स परस्परेण ज्ञात इति च तयोर्युगपदुत्पन्नं तत् स्मितमसूचयत् । पुनरन्यदा सम्भाषणीयमिति मन्यमाना निरञ्जना गृहाभ्यन्तरमगच्छत् ।

## प्रकृतिभेदः

देवः— किमरे हस्ते रूप्याणि धारयसि । कति ? कुत्र नयसि ?

भानुः— पञ्चाशत् । लेखालयं नयामि, धनादेशेन प्रेषयितुम् ।

देवः— कस्मै ?

भानुः— मम गृहिण्यै ।

देवः— क्व सा सम्प्रति वर्तते ?

भानुः— पितृगृहे ।

देवः— किमिति ?

भानुः— प्रसवाय तत्र गता ।

देवः— पितृगृहे वर्तमानायै किमिति त्वया रूप्याणि प्रेषणीयानि?

भानुः— अवश्यकर्तव्याय व्ययाय ।

देवः— सर्वं व्ययं पिता करिष्यति । कुतस्त्वया रूप्याणि प्रेषणीयानि ?

भानुः— मम कुटुम्बिनी सा । मया भर्त्रा भर्तव्या । अतो ममैष धर्मः यत् तस्याः सर्वसौकर्यसम्पत्तये यावदपेक्षं धनप्रेषणम् ।

देवः— त्वदीयधनव्ययेन पितृगृहे कुतो वासः ? इहैव कस्मान्न तिष्ठति ?

भानुः— अत्र साहाय्याय मनुष्या न सन्ति । अतस्तत्र गता ।

देवः— न न । नाहमेवं कदाचिदपि करोमि । मद्गृहिण्याः मद्गृहात् प्रस्थानादारभ्य पितृगृहात् पुनःप्रत्यागमनपर्यन्तं सर्वो व्ययः पित्रैव उह्यते । न मया एका पैसाऽपि दीयते ।

भानुः— निरनुक्रोशस्त्वम् । शिशवः फलानि वाञ्छन्ति । पुष्पं क्रेतव्यम् । किं सर्वस्य कृते परमुख प्रेक्षणीयम् ? अपि च किं तव मम वा श्वशुरकुलं तथा आढ्यम् । समये रिक्तहस्तो भवेत् श्वशुरः । ऋणमपि दुर्लभं भवेत् । भवादृशैः परक्लेशानभिज्ञैः लुब्धैः लोके बहवः महतीं पीडामनुभवन्ति ।

## ॥ पुस्तकपरामर्शः ॥

**केनोपनिषत्** । श्री शाङ्करभाष्यद्वयसंयुता । श्री सच्चिदानन्दसरस्वतीसंयमिभिः संशोधिता । भाष्यटिप्पण्या योजिता च । Manager, Adhyatma Prakasa Karyalaya, Holanarasipur, Mysore State— अतो लभ्या । मूल्यं द्वे रूप्ये ।

न परं वैदुष्यं, विमर्शकौशलमपि विशिष्टं सम्पादकानां यतिवराणाम् । तेन उपनिषद् भाष्यं च अध्येतॄणां विमर्शकानां चातीव उप-

TIRUPATI.

योगार्हतया पदवाक्यपर्वविभजनपुरस्सरं सुसम्पादितमस्मिन् प्रकाशने। ललितविशदा, प्रौढसंक्षिप्ता ऋजुविमला संशयच्छेदिनी च टिप्पणी योजिता। केनोपनिषदः पदभाष्यं वाक्यभाष्यमिति द्वे भाष्ये शाङ्करत्वेन प्रसिद्धे स्तः। द्वे अप्यत्र प्रकाशिते विवृते च। तत्र वाक्यभाष्यं वस्तुतः श्री शङ्कराचार्यकृतं न भवितुमर्हतीति अयं सम्पादको अभिप्रैति।

अन्ते केनोपनिषत्सारः मन्त्राणां वर्णानुक्रमणी, भाष्यस्थमुख्यशब्दसूची चानुबद्धधाः।

---

त्रिकम्। हैदराबाद् राजा बहदूर् वेङ्कटरामरेड्डी महिला कलाशाला संस्कृताध्यापकेन शिरोमणि सन्निधानं सूर्यनारायणशास्त्रिणा कृतम्। मूल्यं सार्धं रूप्यम्।

कीरसन्देशः, विप्रवीरः, मधुकोशः इति त्रीणि क्षुद्रकाव्यानि अत्र सन्ति। अत एव त्रिकमिति नाम। तेषु आद्ये रुक्मिण्या कीरं दूतीकृत्य कृष्णं प्रति सन्देशः प्रेष्यते। द्वितीये खड्गतिक्कनाम्नो विप्रवीरस्य शौर्यं वर्ण्यते। तृतीये मुक्तकरीत्या शृङ्गारो निबद्धः।

श्री सन्निधानं सूर्यनारायणशास्त्री आजानसिद्धः कविः। कवयितुं प्रवृत्तस्यास्य रचनायां सरलानि संस्कारवन्ति सुश्लिष्टानि रसनिष्यन्दीनि च पदानि अहमहमिकया आपतन्तीति मतिः इमानि काव्यानि पठतां सहृदयानां अवश्यम्भाविनी। वर्तमानकविकृतं एवं रसपरिवाहिकाव्यान्तरं अस्माभिर्न दृष्टम्। स्वकीयानां आन्ध्रभाषाकाव्यानां संस्कृतपरिवर्ता इमे स्वयं कविना कृताः।

सहृदयशिरोमणि – गुण्डेराव् हरकारे- लिखितः कीरसन्देशोपोद्घातः बहुविषयावमर्शी रमणीयः।

आर्यावृत्ते प्रथमतृतीयपादान्ते लघोर्गुरुत्वं संस्कृतसाहित्यविदां नेष्टमिति श्रीमान् शास्त्री स्मर्तुमर्हति। शृ, श्रु अनयोर्नियमेन विपर्यासो दृश्यते। 'श्रुतिपेयानि शृण्वन्' (की. 8.) इत्यत्र न परं 'शृ' 'श्रु' कृतम्। किन्तु पर्वस्य लघोः संयोगपरत्वनिमित्तकं गुरुत्वमप्याश्रितम्। थ ध विपर्यासोऽपि क्वचिद्दृश्यते (वि. 22.)। 'पालेरुतीरस्थित' (वि. 54) इत्यत्र समासो न घटते। स्थितस्येति पृथक्पदत्वमावश्यकम्। शब्दानां अत्यन्तशुद्धौ दृष्टिः क्रियमाणा काव्यानामुत्तमोत्तमत्वाय कल्पेत।

---

Registered No M 2300.

Book XXXIII ॥ श्रीः ॥ Nos. 7-8

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

—:o:—

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३३] कलि ५०६१ शार्वरी-प्लव — मीन-मेषौ [सं ७-८

# THE UDYANA PATRIKA

A
SANSKRIT MONTHLY

MARCH & APRIL 1961.

In case you have not received the previous number please inform the Editor or Publisher immediately.

पत्रिकामूल्यं निश्शेषं प्रेष्य उपकर्तव्यम् ।

**Kindly help the poor journal by sending the arrears of your subcription**

**For the rate of subscription please see inside.**

# UDYANA PATRIKA.


Annnal Subscription: Rs. Three only.

Foreign Twelve Indian Rupees.


उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं त्रीणि रूप्याणि ।

२ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

३ वर्षमध्ये ग्राहकीभवतामपि कन्यासङ्क्रिकादिरेव पत्रिका प्रेष्येत ।

४ एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

५ प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

६ एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण सार्कं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

७ लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।


निर्वाहकसम्पादकः *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.


## विषयाः ॥


1. श्रीकमलाप्रपत्तिपञ्चाशत् ।
2. सत्यम् ।
3. वसुमान्-4
4. गीतार्थदीपः । ३२१–३२४

The Githartha Sangraha-25-28

KENDRIYA SANSKRIT VIDYAPEETHA TIRUPATI LIBRARY

पञ्चाननं विषमदन्तमिभं किराती-
मन्यं च तं तमहमन्वहमन्वधावम् ।
यस्या दृगेव मदवग्रहखण्डनी ता-
मुन्मत्तकः खलु रमां चरमं स्मरामि ॥ १० ॥

यत्पातभेदमनुरुध्य जयन्ति लोके-
ष्वाढ्यः प्रभुः क्षितिपतिर्नृपसार्वभौमः ।
देवेन्द्र इत्यपि च दुर्लभभोगभाजः
सा ते दृगम्ब कुशलं मम संविधत्ताम् ॥ ११ ॥

त्वद्दृङ्निपातकलया खलु वाजिनाग-
भृत्याम्बरावसथगोमहिषाबलाद्याः ।
वृण्वन्ति मर्त्यमनुभावधृतिप्रहर्ष-
कीर्त्यादयोऽपि कमले निखिलाः पुमर्थाः ॥ १२ ॥

कादम्बिनी तव तु मातरपाङ्गमाला
यस्याः कृपापवननोदनचञ्चलायाः ।
कल्याणतातिरभितो हरति प्रवर्षः
कार्पण्यसंभृतमवग्रहघोरतापम् ॥ १३ ॥

लोके समस्तमपि वस्तु जनस्य भोग्यं
क्रय्यं हि मूल्यसदृशद्रविणप्रदानैः ।
तस्याखिलप्रतिनिधेर्द्रविणस्य मात-
र्दीव्यत्यपाङ्गविसरस्तव पूर्वरूपः ॥ १४ ॥

मातः पयोधितनये त्वदपाङ्गवर्तिः
कार्ष्णायसद्युतिरपि प्रणयेन दीप्ता ।
चित्रं प्रवर्षति वसुप्रचयं हिरण्य-
रूप्यप्रवालमणिमौक्तिकमुख्यसारम् ॥ १५ ॥

धान्यस्य वा पशुगृहानुगसम्पदो वा
व्युत्पन्नयोषिदनुरोधसुखस्य वापि ।
या भागिनः परिणमत्यधिकारमुद्रा
सा त्वत्कटाक्षजतुमुद्रणसंप्रक्लृप्ता ॥ १६ ॥

शूरो बली शुभगुणो निपुणः सुरूपो
दान्तो विपश्चिदपि वा यदि पण्यवीथीम् ।
लोकाभिधां भजति तत्र तदर्घमाला
लक्ष्मि त्वदीक्षणकलाव्यतिभेदनिष्ठा ॥ १७ ॥

तत्को गुणो गुणगणैस्त्वदनादृतैर्नः
सम्माननां जगति ये बत नाप्नुवन्तः ।
वन्ध्यत्वतो विपरिणामदशां विशन्तः
शल्यानिवान्तरनिशं हृदयं तुदन्ति ॥ १८ ॥

यैर्जीव्यते जगति तैरनिशं प्रजाभि-
राशास्यते निजगुणाभ्युपपत्तिरुच्चैः ।
स्वात्मापि कुत्सयति तत्प्रतिपत्त्यपेतान्
सा न प्रसिद्ध्यति विना त्वदपाङ्गपातम् ॥ १९ ॥

यत्नं करोति निखिलो निखिलोऽपि चार्थैः
सार्थक्यमिच्छति कृतस्य च विक्रमस्य।
व्यर्थं स्वजीवितमवैति च तानविन्दन्
तेऽर्थाः कटाक्षकिरणावलयस्तवाम्ब ॥ २० ॥

यस्त्वत्प्रसादविमुखो न हि कार्यमस्ति
तस्येह कोऽपि स निवृत्त इति प्रतीतः।
यस्यास्ति कार्यमिह किञ्चिदपि त्रिलोक्यां
वृत्तिं न विन्दति स ते करुणां विहाय ॥ २१ ॥

कोटित्रयं प्रभवतां प्रतिपत्तिभेदे
दृष्टं भुवि त्वयि तु तद्द्वयमेव मातः।
अर्थान् ददासि सकृपा वितरस्यनर्थान्
यत्केवलं कमलजे त्वमुदासमाना ॥ २२ ॥

कान्तारपुष्पवदमी विकसन्त्युपांशु
नित्यं गुणा गुणवतां बुधलोकमान्याः।
भाग्यात् क्वचित् गुणिगुणज्ञसमागमः स्यात्
तत्तेऽम्ब वीक्षणकलावशगं तु भाग्यम् ॥ २३ ॥

सन्त्वर्बुदं दिविषदो मतिशौर्यविद्या-
सौन्दर्यदा न खलु तैश्चरितार्थता नः।
भाग्यं ततः परमपेक्ष्यत एव तत्त-
दुद्भासनाय तव मातरनुग्रहेण ॥ २४ ॥

अस्त्यम्बुजे परिमलो न तु वाति वातो
रत्नानि सन्ति विचिनोति जनो न तज्ज्ञः ।
गातुर्विधित्सति कुहूं न मधुः प्रवृत्तः
किं नो गुणैस्तव कृपालवविप्रलब्धैः ॥ २५ ॥

श्रीयुक्तमीरयति सर्वमपि प्रशस्तं
स्वप्नेऽपि चिन्तयितुमश्रि बिभेति लोकः ।
सा श्रीस्त्वमेव यदि मङ्गलदेवतां त्वां
मुक्त्वा क्व यातु कृपणः शरणार्थिसार्थः ॥ २६ ॥

उद्भासयन्तमसतोऽपि गुणान् सतोऽपि
दोषाननुत्तमगुणानिव दर्शयन्तम् ।
व्यक्तान् गुणानपि तिरोदधतं तवाम्ब
मोहाञ्जनाभमवलोकमनुस्मरामः ॥ २७ ॥

सा शक्तिरप्रतिहता धृतिरन्यरूपा
सौभाग्यसम्पदितराऽभिनवा च कान्तिः ।
सिद्धिश्च सा करगता निखिलेषणानां
मातस्त्वदीक्षणकलाकलिताऽर्थमाला ॥ २८ ॥

शून्यं विचिन्तयति निश्वसिति प्रकामं
प्रम्लायते किरति बाष्पमुपैति दैन्यम् ।
मृत्युं प्रशंसति विनिन्दति च स्वजन्म
मातर्मनुष्यहतकस्त्वदपाङ्गदूरः ॥ २९ ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधः खेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु ३३] कलि ५०६२ शार्वरी-प्लव मीन-मेषौ [सं ७-८

(1961-March-April)

## ॥ सत्यम् - 1 ॥

उत्तमं पुरुषार्थं प्राप्तुमिच्छतां पुरुषाणां उपादेयान् विषयान् प्रतिपादयन्ती श्रुतिः प्रथमं सत्यं प्रशंसति ।

सत्यं परम् ; परं सत्यम् ।

आत्महितैषिणां साधूनां उपादेयेषु विषयेषु अन्यस्मात् सर्वस्मात् सत्यं परं उत्कृष्टम् । आदरातिशयेन पुनराह- परं सत्यमिति । उत्कृष्टमेवेत्यवधारणे तात्पर्यम् ।

सत्येन न सुवर्गाल्लोकात् च्यवन्ते कदाचन ।

सत्यवदनशीलस्य पुंसः तेन सत्येन हेतुना परलोके शाश्वतं सुखं भवतीति भावः ।

सतां हि सत्यम् ।

लक्षणमिति शेषः । ये सत्यवादिनः त एव सन्तः, नेतरे ।

तस्मात् सत्ये रमन्ते ।

यस्मात् सत्येनैव सन्तो भवन्ति, अन्यथा न भवन्ति, तस्मात् सत्ये रमन्ते, आदरं प्रीतिं च कुर्वन्ति मतिमन्तो जनाः ।

# ॥ वसुमान्-4 ॥

उद्दिष्टयोर्वरयोः एकः कन्यायाः न रुचये । अपरः तत्पितुः धनाशापिशाचाविष्टत्वात् निरञ्जनारत्नपालयोर्न रुचये । अतः किं कर्तव्यमिति चिन्तया आकुलयोरेतयोः सतोः यदतर्कितं वसुमान् तत्र आगच्छत् तेन तयोरुभयोर्मनसि युगपत् 'अयं वसुमानेव ललितायाः वरः कुतो न भवितुमर्हतीति धीरुदभवत् । तस्मादुभौ तौ परस्परं दृष्ट्वा अहसताम् ।

दिनान्तरे निर्वर्तितगृहकृत्या निरञ्जना भर्तुः सकाशं गत्वा सम्भाषणमकरोत् ।

निरञ्जना— तस्मिन् दिने आवयोः सम्भाषमाणयोः किल वसुमान् आगच्छत् ।

रत्नकान्तः— आम् ; आगच्छत् । किमिदानीं तत्प्रति ?

निरञ्जना— न किमपि । तदा मां दृष्ट्वा अहसत् किल आर्यपुत्रः ।

रत्न— आम् । अहसम् । त्वमपि मां दृष्ट्वा अहसः ।

निरञ्जना— सत्यं, अहसम् । तदस्तु । इदं तु पृच्छामि । आर्यपुत्रो वक्तुमर्हति; तस्य हासस्य को हेतुः ?

रत्न— त्वं तावद् वद ; तव हासस्य को हेतुः ?

निरञ्जना— प्रथमं पृष्टवती अहम् । मत्प्रश्नस्य प्रथमं उत्तरं दीयताम् । पश्चात् आर्यपुत्रप्रश्नस्य अहमुत्तरं दास्यामि ।

निरञ्जना– कथं अभूतपूर्वः अन्याये अभिनिवेश आर्यपुत्रस्य।

रत्न— तत् प्रति पश्चाद् विचारं कुर्याम। अद्य मम वाचं शृणु। ब्रूहि कुतस्त्वं अहसः। तच्छ्रवणे मम महत् कुतूहलम्।

निरञ्जना— तथा चेद् वदामि। .... .... .... ....

निरञ्जनायां एवं वदन्त्यां सत्यां पूर्ववत् अचिन्तितं वसुमान् अन्तः प्रविवेश। रत्नपालस्य अनुज्ञया अपेक्षितं वित्तं गृहीत्वा बहिरगच्छच्च। तस्मिन् गते दम्पती उभावपि पूर्वदिन इव परस्परं दृष्ट्वा अहसताम्। हसित्वा निरञ्जना भर्तारमवोचत्— उभयोरावयोर्हासकारणं एकमेव। तच्च इदमिति इदानीं विदितमेव।

रत्न— किमिति विदितम्?

निरञ्जना— वसुमानिति।

रत्न— आम्, प्रिये। आवाभ्यां वरचिन्तायां क्रियमाणायां वसुमान् स्वयं आगच्छत्। ललितायाः अयमेव पतिः कुतो न भवितुमर्हतीति, हस्तस्थमिमं विहाय कुतोऽन्यः कोऽपि अन्वेषणीय इति, मन्यमानस्य मे हास उदभवत्। तवाप्येवमेवेति अद्य ज्ञात्वा सन्तुष्यामि। भगवता सङ्कल्पितोऽयं अस्माकं जामातेति भाति। किं त्वं मन्यसे?

निरञ्जना— अहमपि तथैव मन्ये। भगवत्सङ्कल्पादेव हि न परं तस्मिन् दिने, अस्मिन्नपि दिने वत्साया विवाहप्रस्तावे स आगच्छत्।

रत्न— शोभनं निमित्तमिदं, न सन्देहः। किन्तु यः कोऽप्ययं अज्ञातकुलगोत्रः दरिद्रसार्वभौमः अन्नहेतोरागत्य अस्मद्गृहे

रत्न— न्याय्यं तत्, यत् त्वं वदसि। तथापि त्वमेव तावत् प्रथमं ब्रूहि तव हासकारणम्।

बसति । स कथमसत्पुत्र्याः पतिः, आवयोर्जामाता, भवितु-मर्हति ?

निरञ्जना— नूनमयं आवाभ्यां सम्यक् परामर्शनीयो विषयः । तत्र अस्य आकारः महाकुलप्रसूतमेनं ज्ञापयति । तेजोविशेषः स्थिरां श्रीमत्तामावेदयति । नूनमस्य दारिद्र्यं वनवासिनो राघवस्येव अज्ञातवासे स्थितानां पाण्डवानामिव च विधिबलकृतं अल्पकालवर्ति । आयतिरस्य शोभनेति हृदयं मे ब्रवीति ।

रत्न— सर्वेषु विषयेषु त्वं मे समानहृदया । मम हृदि यत् स्थितं तदेव त्वं भाषसे । वसुमन्तमपेक्ष्य श्रेयान् वरो लप्स्यत इति न मे प्रत्ययः । अतोऽयमेवास्तु आवयोर्जामाता । अतः परं विवाहसम्भारसम्भरणचिन्तां कुर्याम ।

निरञ्जना— आवां एवं निश्चयमकार्ष्व । तयोः परस्परं का मनोवृत्तिरिति हि ज्ञातव्यम् । तयोरुभयोः, अन्यतरस्य वाऽनि-च्छायां आवयोर्निश्चयेन किं भविष्यति ?

रत्न— आम् । एवमेतत् । किन्तु अहं प्रतिजाने मया यदुच्यते तत् कदापि वसुमान् न प्रतिषेत्स्यति । ममात्यन्तविधेयः सः ।

निरञ्जना— (सासूयमिव) न तथा आर्यपुत्रस्य विधेयः, यथा मम । मयाऽप्युक्तो नैव प्रतिषेत्स्यति । वत्साऽपि अस्मदभिप्राय-प्रतीपगामिनी नैव भविष्यति । अथापि तस्या अभिप्रायं ज्ञात्वा श्वः आर्यपुत्राय निवेदयिष्यामि ।

## त्रयोदशोऽध्यायः ।

श्री भगवानुवाच--

४८९ इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥

पूर्वस्मिन् षट्के कर्मयोगज्ञानयोगावभिहितौ। तच्च पेटिकाद्वयात्मकम् । शास्त्रोपोद्धातशास्त्रावतरणहेतुभूतशोकनिवर्तकात्मदर्शनपरं तत्र प्रथमद्विकम् । आत्मदर्शनस्यैव साधनप्रपञ्चनपरं शेषचतुष्कं इति विभागः । द्वितीयषट्के 'ज्ञानकर्माभिनिर्वर्त्यो भक्तियोगः प्रकीर्तितः ।' तच्च त्रिकद्वयात्मकम् । तत्र प्रथमं त्रिकम्– साधनाधिकारिफलादिभेदपरिकर्मितभक्तियोगस्वरूपपरम्, तदुत्पत्तिविवृद्ध्यर्थपरं द्वितीयं त्रिकम् इति विवेकः । तथा तृतीयं च षट्कं त्रिकद्वयात्मकम् । तत्राऽद्यं त्रिकं प्रधानपुरुषव्यक्तसर्वेश्वरविवेचनपरम् । द्वितीयं तु कर्मज्ञानभक्त्यादिशोधनपरम् । सिद्धसाध्यपरत्रिकद्वयात्मकमिदं तृतीयषट्कं प्रथममध्यमषट्कद्वयशेषभूतम् । तत्र तावत्–'देहस्वरूपमात्माप्तिहेतुरात्मविशोधनम् । बन्धहेतुर्विवेकश्च त्रयोदश उदीर्यते ॥" अस्मिन् सङ्ग्रहश्लोके 'च' कारेण देहयाथात्म्यशोधनं विवक्षितम् । अथ 'गतासूनगतासूंश्च' इति प्राक् स्वेनैवोपक्षिप्तक्रमेणापृष्टोऽप्यवसरे प्राप्ते स्वयमेव परिशोधयितुं भगवानुवाच– हे कौन्तेय ! अर्जुन, इदम्– देवोऽहम् स्थूलोऽहम् इत्येवं आत्मना सह सामानाधिकरण्यभ्रान्तिविषयभूतम्, शरीरम्, क्षेत्रमिति– क्षेत्रवत् अस्मिन् कर्मफलनिष्पत्तेः 'क्षेत्रम्' इति शब्देन, अभिधीयते– तत्त्वविद्भिः कथ्यते, एतत्– सङ्घातरूपेण 'इदमहं वेद्मी'ति, यः– विवेकी वेत्ति– ज्ञानेन विषयीकरोति, तम्, आत्मानम्, तद्विदः आत्मयाथात्म्यविदः, क्षेत्रज्ञः इति क्षेत्रं-शरीरं, जानाति-इदमिति स्वात्मनः पृथक्त्वेन अवगच्छति इति क्षेत्रज्ञः, इति– 'क्षेत्रज्ञः' इत्याकारकशब्देन– प्राहुः– कथयन्ति । वेदितुरात्मनो वेद्यतया शरीरमपि घटादिवदर्थान्तरभूतम् । 'देवोऽहम्' इत्यादिसामानाधिकरण्यं तु शरीरस्यात्मापृथक्सिद्धेरुपपन्ना इति भावः ।

சரீரமும், ஆத்மாவும் தனித்தனி ஸ்வபாவங்களுடையவை என்பதை இரண்டாம் அத்யாயத்தில் தெளிவுபடுத்திய க்ரமத்தில் மறுபடியும் பகவான் விசதமாக்குகிறான்– அர்ஜுநா ! தேவனென்றும், மனுஷ்யனென்றும், பருமன், இளைத்தவன்

என்றாற்போலேயும் ப்ராந்தியினால் ஆத்மாவாகத் தோன்றுகிறது இந்த சரீரம்; இது ஆத்மாவன்று. வயலில் பலன்கள் உண்டாவது போல் ஆத்மாவிற்கு ஸுகம் முதலியவை உண்டாகுமிடமிது. ஆகையால் இதை க்ஷேத்ரம் என்பார்கள். 'இதை நான் அறிகின்றேன்' என்று தன்னிலும் வேறுபட்டதாக இதை அறிகின்றவனை க்ஷேத்ரஜ்ஞன் என்பதாக ஜ்ஞானிகள் சொல்லுகிறார்கள்;

४९० क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥

अथैवमन्योन्यव्यावर्तकाकारवत्तया निर्दिष्टयोः क्षेत्रक्षेत्रज्ञयोर्द्वयोरपि परमात्मशेषत्वमुपदिश्य यथावस्थितक्षेत्रक्षेत्रज्ञज्ञानमेव मे मतमित्याह — हे भारत! भरतवंशोत्पन्न! अर्जुन! सर्वक्षेत्रेषु — देवमनुष्यादिसकलशरीरेषु विद्यमानं, क्षेत्रज्ञं चापि — जीवात्मानमपि, 'अपि' शब्देन अनुक्तं क्षेत्रं समुच्चीयते । तच्च दृष्टान्तार्थं, मां — मदात्मकं, विद्धि — जानीहि । यथा अचेतनं मद्भिन्नमपि मदपृथक्सिद्धतया मत्समानाधिकरणतया निर्देश्यं तथा चेतनोऽपि । अचित इव चितोऽपि नेश्वरेण स्वरूपैक्यं इति यावत । यत् — क्षेत्रक्षेत्रज्ञयोः — ज्ञानं — परस्परं ईश्वराच्च विविक्ताकारतया निश्चयः, तत् — तदेव, ज्ञानं — उपादेयभूतं ज्ञानमिति मम, मतं — अभिमतम् । 'क्षरात्मानावीशते देव एकः' 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' 'यस्य पृथिवी शरीरं' 'यस्यात्मा शरीरं' इत्यादिकमिहानुसन्धेयम् ।

அர்ஜுநா! தேவமனுஷ்யாதிகளான சரீரங்களும் அவற்றிலுள்ள ஜீவாத்மாக்களுமெல்லாம் எனக்கு உடலாய் அவற்றிற்கு ஆத்மாவாக இருப்பவன் நான் என்றறிவாயாக. சேதநம், அசேதநமிரண்டும் எனக்கு விதேயமானது. அவற்றிற்கு நான் ஸ்வாமி. இந்தத் தெளிவுதான் அவச்யமாக ஸம்பாதிக்கவேண்டிய ஜ்ஞாநம் என்பது என்னுடைய மதம்.

४९१ तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥

शृण्वत एवार्जुनस्य पुनः 'शृणु' इत्यवधानार्थमुच्यते -तत् क्षेत्रम्- पूर्वोक्तं शरीरम्, यच्च- जडाजडद्रव्ययोर्मध्ये यदात्मकं द्रव्यं, यादृक्च- यादृशं येषामाश्रयभूतमिति यावत्। यद्विकारि- ये विकाराः अस्य कार्यतया सन्ति तत् यद्विकारि; ये चास्य कार्यभूताः विकाराः; यतश्च- यादृशप्रयोजनरूपहेतोरुत्पन्नं, यत्- जडेष्वेव द्रव्येषु अन्यतमात्मकसङ्घाता- त्मकयोर्मध्ये यत्स्वरूपं; 'यच्च' 'यत्' इति आद्यन्तौ यच्छब्दौ जडद्रव्य- तत्सङ्घातविषयावित्यपुनरुक्तिः। स च- पूर्वोक्तः क्षेत्रज्ञश्च, यः- यत्स्व- रूपः, यत्प्रभावश्च — ये प्रभावाः यस्य सः यत्प्रभावः यादृशप्रकृष्टस्वभाव- विशेषवान्। 'यो यत्प्रभावः' इत्युभाभ्यां स्वरूपप्रकारयोर्निर्देशः। तत्- प्रकृतं सर्वं, समासेन- संक्षेपेण, मे- मत्तः, मत्सकाशात्, शृणु- श्रुत्वा अवधारय इत्यर्थः।

முன் கூறியுள்ள சரீரமானது ஜடமா? ஜடமல்லாததா? எவைகளை அது தரித்துக்கொண்டிருக்கிறது? அதனால் உண் டாகும் விகாரப்பொருள் எவை? அதன் ப்ரயோஜனமென்ன? ஜீவாத்மாவின் ஸ்வரூபமும், அவன் ஸ்வபாவவிசேஷங்களும் எவை? இவை அனைத்தையும் சுருக்கமாகச் சொல்லுகிறேன்: என்னிடமிருந்து கேட்டுத் தெளிவாயாக.

४९२ ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः॥

स्वेनोपदिश्यमानस्यार्थस्येतिहासपुराणमीमांसाऽनुगृहीतत्वमाह— ऋषिभिः- पराशरादिमुनिभिः विविधैः- पृथग्भूतैः, छन्दोभिः- ऋग्यजु- रादिवेदैः, हेतुमद्भिः-प्रतिपादकतया हेतुयुक्तैः, हेतुप्रतिपादकैरिति यावत्। विनिश्चितैः- विशेषेण निश्चितं- निश्चयः येषां तानि विनिश्चितानि तैः, 'निश्चितं' इति भावे क्तप्रत्ययः। निर्णयफलकैः। ब्रह्मसूत्रपदैश्चैव- ब्रह्मणः सूत्राणि ब्रह्मसूत्राणि- तान्येव पदानि तैः ब्रह्मसूत्रपदैः ब्रह्मप्रतिपादक- सूत्राख्यैः पदैः- शारीरकसूत्रैश्चैव, पृथक्- देहात्मनोः परस्परवैलक्षण्येन, बहुधा- बहुप्रकारं, गीतं- कथितं, 'तत् समासेन मे शृणु' इति पूर्व- श्लोकादनुषज्यते। क्षेत्रक्षेत्रज्ञयाथात्म्यं मया संक्षेपेणोच्यमानं शृणु। 'पिण्डः पृथग्यतः पुंसश्शिरःपाण्यादिलक्षणः' इत्येवं पराशरादिभिः, 'अन्योऽन्तर आत्मा विज्ञानमयः, तस्माद्वा एतस्माद्विज्ञानमयात्। अन्यो-

न्तर आत्माऽऽनन्दमयः' इत्येवंरीत्या श्रुतिभिः, 'न वियदश्रुतेः, नात्मा श्रुतेः, परात्तु तच्छ्रुतेः ।' इत्यादिरीत्या ब्रह्मसूत्रैश्च शरीरस्य जीवात्मन ईश्वरस्य च परस्परवैलक्षण्यं बहुधा प्रतिपादितमिह विवक्षितम् ।

சரீரமும், ஜீவாத்மாவும் பரஸ்பரம் வேறுபட்டு ஈச்வரனுக்கு சேஷபூதமாய் நிற்கும் நிலையைப்பற்றி பராசரர் முதலிய முனிவராம், வேதங்களும், சாரீரகஸூத்ரங்களும் பலவாறுகச் சொல்லியிருப்பதை உனக்கு நான் சுருக்கமாய்ச் சொல்லுகிறேன், கேட்பாயாக.

४९३ महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥

४९४ इच्छाद्वेषस्सुखं दुःखं सङ्घातश्चेतनाऽधृतिः ।
एतत् क्षेत्रं समासेन सविकारमुदाहृतम् ॥

'तत्क्षेत्रं यच्च यादृक्च' इति प्रतिज्ञातक्रमेण स्वरूपादिकं विशदयति श्लोकद्वयेन— महाभूतानि- पृथिव्यप्तेजोवाय्वाकाशाख्यानि, अहङ्कारः- महत्तत्त्वाज्जातस्तामसोऽहङ्कारः, बुद्धिः-महत्तत्त्वं, अव्यक्तमेव च-प्रकृतिश्च, इति जडद्रव्याष्टकात्मकमिदं शरीरम् । 'तत्क्षेत्रं यच्च' इत्यस्य प्रतिपादकमिदम् । दश एकं च इन्द्रियाणि- श्रोत्रादीनि पञ्च, वागादीनि पञ्च, मनश्चेत्येकादशेन्द्रियाणि । इन्द्रियगोचराः- ज्ञानेन्द्रियजन्यज्ञानविषयाः, पञ्च च- शब्दस्पर्शादयः । एतानि क्षेत्राश्रितानि तत्त्वानि । 'यादृक्चे'- त्यस्य प्रतिपादकमिदम् । इच्छा-द्वेषः-सुखं दुःखं- इमानि क्षेत्रकार्याणि क्षेत्रविकाराः । आत्मधर्मभूतानीमानीच्छादीनि आत्मनः क्षेत्रसम्बन्धप्रयुक्तानीति क्षेत्रविकारा उच्यन्ते । 'यद्विकारि' इत्यस्य विशदीकरणमिदम् । चेतनाऽधृतिः- चेतनस्य आधृतिः-आधारः, सुखदुःखे भुञ्जानस्य, भोगापवर्गौ साधयतश्च चेतनस्याधारतयोत्पन्नः । 'यतश्च' इत्यस्य प्रतिपादकमिदम् । सङ्घातः- भूतसङ्घातः । 'यत' इत्यस्योपपादनमिह भाव्यम् । प्रकृतिमहदहङ्कारपञ्चभूतात्मकजडद्रव्याष्टकारब्धम्, इन्द्रियाश्रयभूतं, इच्छाद्वेषसुखदुःखविकारि, तत्सङ्घातरूपं चेतनसुखदुःखोपभोगाधारत्वप्रयोजनकं क्षेत्रमित्युक्तं भवति । एतत्- क्षेत्रं, समासेन- संक्षेपेण सविकारं- इच्छादिभिः कार्यैस्सह, उदाहृतं- उक्तम् ।

Krishna replied to him saying that He too, like himself, had previously a great number of births and in one of them He taught the *yoga* to the Sun. This reply immediately gives rise to another question: if both God and Arjuna had births and deaths what is the difference between them, the difference between God and man ? So Krishna added that He knew all His previous births; but Arjuna did not know his. The point to be noted here is, say Ramanuja and Desika, that His births in this world, which we call incarnation, are as real as our own.

Pointing out further distinguishing characteristics of His incarnation Krishna says:—

1. That He loses none of His divine qualities, but all of them are as fully present in Him as ever when he takes birth in this world as Rama, Krishna and other *avataras*.

2. That His form, His body, is not one made of the five elements like that of *jivasi* but one made of that pure divine substance which is called *suddha-sattva* (शुद्धसत्त्व). It is *aprakrita*, other than that which is evolved from *prakriti*, *matter*.

3. That His birth, *avatara*, is due to His own free will and not to *karma*, which is responsible for the births of men.

4. That His birth takes place when *dharma* is waning and *adharma* is raising its head in the world. Men are born when their *karma* is ripe enough to bring about their birth.

5. And that the purpose of His birth is the protection of virtuous men and also the destruction of the wicked. Men are born for experiencing the results of *karma* done in their previous births.

These are the particulars about His incarnation, *avatara*, in this world, which Arjuna wanted to be made known to the world by Sri Krishna Himself and He accordingly explained. Krishna here adds that he who has a correct knowledge of this divine birth and deed of His will attain Him and never be born again.

*(b)* The next subject dealt with in this chapter is '*Karma-yoga* itself as *Gnana-yoga.*' *Karma* does not consist in mere action. It has been already indicated that it always required to be accompanied by a correct knowledge of one's own soul. A practiser of *karma-yoga* should do his motive-less action, always keeping his mind on and directing all his thoughts towards his soul, which is, as has been already explained, quite distinct and separate from the body which it indwells. There is no *karma-yoga* without such true knowledge of his own soul on the part of the practiser. There are thus two elements which constitute *karma-yoga:* unmotived action and soul-knowledge. So *karma*, action practised as *yoga,* can be said to be *jnana* also.

There is also another reason why the *Karma* of a *yogin* can be called *jnana.* A *yogin* knows the truth of not only his own soul but also of the *World-Soul, Paramatman,* the Supreme Brahman. Possessing this *Brahman*-knowledge the *yogin* will have the idea that all that he does or sees or employs is Brahman, always present in him. He himself, the sacrifice or other action he does, the oblation that is prepared and thrown into the sanctified fire, and this fire too, are all Brahman. This Brahman-knowledge also brings the characteristic of knowedge, *gnana,* to the *karma* practised as *yoga.*

(c) Thirdly it is shown in this chapter that there are a number of actions, any one of which can be practised

as *karma-yoga.* The following are some of them (in Desika's words):

| | |
|---|---|
| देवार्चन | Idol-worship |
| इन्द्रियनिरोध | Restraint of organs |
| प्राणायाम | Breath control |
| याग | Sacrifice |
| दान | Gift |
| होम | Offering of oblations |
| तपः | Penance |
| तीर्थसेवा | Bath in sacred waters |
| स्वाध्याय (अभ्यास) | Constant recital of one's own recension of Veda |
| तदर्थाभ्यास-आदिरूपाः | Continued study of its meaning etc. etc. |

A man may choose, according to his learning, capability and taste, any one of these and practise it as *yoga.*

(*d*) After enumerating these varieties of *karma-yoga* the chapter finally shows how important is the above-mentioned knowledge-part of this *yoga.* This is more important than the action-part of it. This knowledge of the soul should be got and made mature through constant hearing from sympathetic knowers that have found out the truth. This knowledge can be considered and said to be mature when there is no possibility of mistaking the body for the soul and when one is able to see that the soul as an intelligent thing is the same in all beings and in this respect it is also the same as God.

This if obtained destroys all sins, all *karmas,* that have accumulated throughout the beginningless past. As purificator it has nothing to equal it.

KENDRIYA SANSKRIT VIDYA PEETHA
TIRUPATI.
LIBRARY



5. (*a*) Sri Krishna said in the second chapter that *karma-yoga* is the means of *gnana-yoga*, that is, the former leads to the latter. One cannot take up *gnana-yoga* at once. It is a difficult *yoga*. *Karma-yoga* is easier than that. Therefore one should first practise *karma-yoga* and acquire competency for *jnana-yoga* and then practise it. Subsequently, however, He said in the third and fourth chapters that even one competent to practise *jnana* should take to *karma*, indicating by this that the same result which is to be achieved through *jnana*, namely self-realisation, *atma-sakshatkara*, could be directly achieved by means of *karma*. Now Arjuna asks which of the two *yogas*, *karma* and *jnana*, would help one to achieve the result, self-realisation, sooner. Answering this question of *Arjuna* with which the fifth chapter of the Gita opens, Krishna says that it is *karma* and not *jnana* which brings about self-realisation more quickly— योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ।

(*b*) Having thus replied to Arjuna, Krishna goes on to give some details regarding the ascription of the agency by *yogins* in respect of all their actions to Matter, mentioned in the third chapter. A man does so many actions through his body, breath and sense as well as motor organs. The soul that dwells in the body and uses the organs is the agent of all actions that it does. But that agency is not inherent in it but only happens to it on account of the body, breath and organs that it possesses. Taken in itself, it has no agency in respect of any of the actions it appears to do. A *yogin* should therefore think always that he does nothing; the organs, breath, and body are pursuing their own course.

नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित् ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥

Registered No M 2300.

Book XXXIII ॥ श्रीः ॥ Nos. 9-10

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

—:o:—

ये संस्कृतप्रियाः सन्तस्तेषां सद्मानिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३३] कलि ५०६१ वृष – ऋषभ-मिथुने [सं ९-१०

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

MAY & JUNE 1961.

In case you have not received the previous number please inform the Editor or Publisher immediately.

पत्रिकामूल्यं निश्शेषं प्रेष्य उपकर्तव्यम् ।

Kindly help the poor journal by sending the arrears of your subcription

For the rate of subscription please see inside.

# UDYANA PATRIKA.


Annual Subscription: Rs. Three only.
Foreign Twelve Indian Rupees.

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं त्रीणि रूप्याणि ।
२ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
३ वर्षमध्ये ग्राहकीभवतामपि कन्यासङ्क्रिकादिरेव पत्रिका प्रेष्येत ।
४ एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
५ प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।
६ एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)
७ लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः *Mimamsarnava Mimamsakesari, Panditaraja* D. T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.


## विषयाः ॥


1. श्रीकमलाप्रपत्तिपञ्चाशत् ।
2. सत्यम्-2 ।
3. मुकुन्दमाला ।
4. रामराज्यम् ।
5. वसुमान्-5
6. प्रकृतिभेदः ।
7. रामायणविभागः ।
8. लोकवार्ता ।
9. श्री लक्ष्मीपञ्चाशत् ।

KENDRIYA SANSKRIT VIDYAPEETHAM TIRUPATI LIBRARY

स्वेनैव षोडशकलानिलयोऽपि चन्द्रः
प्रह्लादनस्त्वदुपजुष्टतयैव जातः ।
आमोदशालि जलजन्म च तत्तथैव
सौभाग्यमम्ब भवती खलु तत्र तत्र ॥ ३० ॥

ते मन्थरा अपि महामतयः कुलीना
हीना अपि प्रणयिनः कटुभाषिणोऽपि ।
स्वार्थोद्यता अपि मनस्विगणाग्रगण्या
येषां तवाम्ब नयनान्तकलाभिमुख्यम् ॥ ३१ ॥

मातः किमस्फुटितकोमलपादपद्मै-
रारक्तकोकनदमञ्जुलपाणिभिर्वा ।
प्रसंज्ञयैव परतन्त्रजनोपजुष्टै-
र्भाव्यं विना प्रभुभिरत्र तव प्रसादम् ॥ ३२ ॥

गान्धर्वनृत्तपटुचाटुकथोपहास-
नेपथ्यविभ्रमरसप्रचुरास्तरुण्यः ।
किं भूषयन्ति सदनं मदयन्ति किं वा
चेतः कदापि विगतत्वदनुग्रहाणाम् ॥ ३३ ॥

ईषत्करोपशमनान् प्रबलान्तरायान्
सङ्कल्पसौधवलभीशयिताः स्मरन्ति ।
भग्नोद्यमा अपि सकृत्पुनरुत्सहन्ते
तेजस्विनस्तव कटाक्षलवप्रसादात् ॥ ३४ ॥

श्रद्धाक्षमाविनयसौहृदयत्नतुष्टि-
स्थैर्यौचितीप्रमितभाषणशौर्यमुख्याः।
पद्मे त्वदीक्षणभृतां न गुणा यदि स्यु-
र्वृण्वन्ति तद्धृतकवर्गममी हठेन॥ ३५॥

क्रुध्यन्ति मय्यहह ते न करोमि कोपं
हिंसन्ति मां न परपीडनमावहामि।
ते भूरि मामपवदन्ति न दूषयामि
लक्ष्मि त्वमेव वद मातरमुष्य हेतुम्॥ ३६॥

शङ्कापदेषु भवति प्रथमं गृहीतो
निन्दापदेषु च पदं कटुवाक्क्षतानाम्।
अर्थोपसङ्ग्रहजुषामवधीरणाया
नित्यास्पदं य इह ते नयनान्तदूरः॥ ३७॥

मौर्ख्यं विगर्ह्यमतिहेयमवैदिकत्वं
कुत्सापदं कृपणतेत्यपि लोकदृष्टम्।
पर्यस्तमेव निखिलं धनिकेषु पश्यं-
स्त्वामम्ब विस्मयजडो विधुरः प्रपन्नः॥ ३८॥

मामिन्दिरे द्रविणशून्यमनर्थरूपं
स्थाने विदन्ति विभवः स्वमुपाश्रयन्तम्।
वागर्थवद्वदनमण्डल एव सोऽहं
कस्मादयासिषमवाङ्मुखतां प्रसर्पन्॥ ३९॥

अन्यार्थदारपदवीपरिभोगकीर्ति-

ष्वत्यन्ततर्षमवमर्षमपि व्रजन्तः ।

धन्या जगत्सु धनराशिनिषादिनस्ते

नित्यं वृणोति यदनुग्रहमर्थिलोकः ॥ ४० ॥

येनेश्वरा अविदुषोऽपि न दुःखभाजो

याञ्चाभृतो धनिषु यत्सुधियोऽपि दीनाः ।

तन्मां प्रति प्रबलपूर्वभवाघसङ्घै-

र्निःस्वत्वमत्र फलमल्पतमैश्च मौर्ख्यम् ॥ ४१ ॥

श्वश्रूस्नुषाव्यतिकरे विरसे प्रसक्ते

वाग्देवताकमलयोर्युवयोर्वतास्मिन् ।

अस्मादृशाः कतिचिदल्पनिरूढपुण्याः

क्रोष्टुर्लभेमहि दशां हुडुमध्यगस्य ॥ ४२ ॥

सर्वात्मना समुपलभ्य सरस्वतीं तां

मातः स्नुषां तव निरुध्य पदक्रमेषु ।

त्वय्यर्पयामि निरवग्रहसाहसोऽहं

भूयासमेवमपि किन्नु न तेऽनुकम्प्यः ॥ ४३ ॥

आविष्कुरु प्रचयमुच्चतरस्य धाम्नः

शौर्यं विधेहि विश संशयमप्यसूनाम् ।

आयास्य मामिति दयावति सत्वरेव

कांश्चिद्वृणोषि तमसोपहतानकस्मात् ॥ ४४ ॥

स्त्री नाम तत्रभवती जननी प्रजानां

दुग्धाब्धिजातनवनीतमनोज्ञमूर्तिः ।

नोचेद्दयालवलवस्तव दुर्विधेषु
कस्मान्नृणां नवधनोष्मनिरङ्कुशानाम् ॥ ४५ ॥

सोदर्यतां तव कलावति दुग्धसिन्धो-
र्जन्मामृतेन परिभाव्य च साहचर्यम् ।
आशंसते विविधमीप्सितलाभमादौ
दीनो जनः स्मरति हालहलस्य पश्चात् ॥ ४६ ॥

व्यर्थानुरोधपरिपीडितमर्थिभावे
मामक्षमाकलुषमाहृतरूक्षवाचम् ।
मातर्विभाव्य दयया नलिनाक्षजाये
क्षन्तुं प्रसीद हृदये न निधेहि मन्तुम् ॥ ४७ ॥

नित्यद्रुतद्रविणलीनमनोरथस्य
नैराश्यतो मृधभुवि प्रविकीर्णहेतेः ।
त्वामेव चाम्ब शरणं प्रतिपद्यमान-
स्यायासकर्कशमनर्हवचः क्षमस्व ॥ ४८ ॥

लक्ष्मि त्वदीक्षणकलालवलाभतर्षाद्
भूरि प्रलप्य विरतोऽस्मि जडीकृतात्मा ।
अङ्गीकुरु प्रसभमम्ब जनं प्रपन्न-
मस्मिन् प्रपञ्चय दयार्द्रदृगन्तपातान् ॥ ४९ ॥

मामाशु मातरपरिप्लुतलोकवार्त-
मप्रार्थनं प्रभुषु मानविपत्तिहीनम् ।
बन्धुष्वहेयमुपकारिणमाश्रितेषु
लोकं प्रति प्रचुरकार्यभरं विधेहि ॥ ५० ॥

॥ इति श्रीमन्महालिङ्गकविविरचिता श्रीकमलाप्रपत्तिपञ्चाशत् समाप्ता ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधः खेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु ३३] कलि ५०६२ प्लव– ऋषभ-मिथुने [सं ९–१०
(1961–May–June)


## ॥ सत्यम् - 2 ॥

पुनरपि सत्यस्य पारम्यमुपदिशन्ती श्रुतिः कयाचित् कथया उपक्रमते ।

**प्राजापत्यो ह आरुणिः सुपर्णेयः प्रजापतिं पितरमुपससार ।**

अरुणो नाम कश्चन प्रजापतिरासीत् । तस्य पत्नी सुपर्णा नाम । अनयोः पुत्रः कश्चिदासीत् । सः स्वपितरं प्रजापतिं उपसरति स्म । तत्सविधं गत्वा प्रणम्य कञ्चन प्रश्नं अकरोदित्यर्थः ।

सः प्रश्नः कः, इति चेत्, उच्यते—

**किं भगवन्तः परमं वदन्तीति ।**

भगवन्तः पूज्याः महान्तः किं परमं उत्कृष्टतमं वदन्ति ? इह जातेन मनुष्येण यत्र अत्यन्तमादरः कर्तव्यः स उत्तमोत्तमो गुणो वा धर्मो वा कः ? कं गुणं वा धर्मं वा प्राज्ञा आचार्याः उत्तमोत्तमं वदन्तीत्यर्थः ।

अस्य प्रश्नस्य साक्षात् उत्तरं अन्ते वक्ष्यति । तदुपपत्तये तु प्रथमं सत्यस्य वैशिष्ट्यं प्रतिपादयति —

**सत्येन वायुरावाति । सत्येनादित्यो रोचते दिवि ।**

सततगमनं वायोः धर्मः । स यदि कदाचित् गमनं विना स्तब्धो वर्तेत, तदा सः सत्यात् प्रच्युतः स्यात् । नाहमेवं स्यामिति सत्यपरिपालनतृष्णयैव वायुर्वाति । एवं प्रकाशस्वभाव आदित्योऽपि स्वधर्माचरणरूपसत्यपरिपालनश्रद्धयैव प्रत्यहमुदयमानः व्योम्नि प्रकाशत इति भावः ।

एवं क्रियासत्यमुक्तम् । अथ वाक्सत्यमाह—

सत्यं वाचः प्रतिष्ठा ।

इति । इदं करोमि, इदं ददामि इत्युक्त्वा यदि तथैव करोति, ददाति च तर्हि करोमि, ददामि, इत्युक्ता वाक् स्वार्थस्य वस्तुतो विद्यमानत्वात् तत्र प्रतिष्ठिता भवति । यदि न करोति न ददाति च तर्हि अर्थशून्यत्वात् स्वार्थाच्चलिता भवति, न प्रतिष्ठिता । तस्मात् सत्यं वाचः प्रतिष्ठा ।

अथ न केवलं वाचः, अपि तु सर्वस्य जगतः प्रतिष्ठा सत्यमित्याह—

सत्ये सर्वं प्रतिष्ठितम् ।

इति । यदि सूर्यः सत्यात् भ्रष्टः प्रातः प्राच्यां दिशि नोदियात्, वातो न वायात्, पर्जन्यो न वर्षेत्, पृथिवी चलेत्, कथं जगति जना जीवेयुः ? अतः सर्वं सत्ये प्रतिष्ठितम् ।

एवं सत्यस्य महिमानं प्रतिपाद्य अथ प्रश्नस्य साक्षादुत्तरमाह—

तस्मात् सत्यं परमं वदन्ति ।

इति । किं परमं वदन्तीति प्रश्नः । सत्यं परमं वदन्तीत्युत्तरम् । मनोवाक्कायैः सत्यं सर्वैः परिपालनीयम् ।

# मुकुन्दमाला ॥

ध्यायन्ति ये विष्णुमनन्तमव्ययं
हृत्पद्ममध्ये सततं व्यवस्थितम् ।
समाश्रितानां सतताभयप्रदं
ते यान्ति सिद्धिं परमां च वैष्णवीम् ॥ ३८ ॥

एकदिनात्मके काले पञ्चधा विभक्ते यः चतुर्थो विभागः, तस्मिन् स्वाध्यायाभिधाने यत् कर्तव्यं तत् मनसि निधाय पूर्वश्लोकद्वये किञ्चिदभिहितम् । अथ चरमे योगाभिधाने विभागे कर्तव्यं ध्यानं प्रस्तुत्य किञ्चिदाह— ध्यायन्तीति ।

ये जनाः ध्यायन्ति। कम्? विष्णुं, श्रीमन्तं नारायणम्।

कथम्भूतम्? अनन्तम्। देशकालवस्तुपरिच्छेदरूपैः त्रिभिः अन्तैः रहितम्। अव्ययं विकाररहितम्।

हृत्पद्मं हृदयकमलम्। तस्य मध्ये सततं विशेषेणावस्थितम्। ध्यानानुरूपविग्रहविशेषविशिष्टतया सन्निहितमित्यर्थः।

समाश्रितानां सर्वकालं अभयप्रदम्। ध्यानप्रवृत्तेः पूर्वं कथं ध्यानं निष्पद्येतेति, ततःपरं कथं विघ्नाः निवर्तेरन्निति च यदा यदा भयं भवति तदा तदा प्रपदने कृते सति तद्भयं निवर्त्य अभयं ददातीत्यर्थः।

ते सिद्धिं अभिमतधनपुत्रादिसम्पत्तिरूपां साधारणीं सिद्धिं, परमां उत्कृष्टतमां वैष्णवीं श्रीवैकुण्ठे निरतिशयानन्दपरिपूर्णब्रह्मानुभवरूपां सिद्धिं च प्राप्नुवन्ति। मोक्षपर्यन्तान् सर्वान् पुरुषार्थान् भक्त्या लभन्त इत्यर्थः। प्रीतिपूर्वकं हि ध्यानं भक्तिरेव।

# रामराज्यम् ॥

(उत्तमस्य राज्यस्योत्तमो राजा)

वि. वि. श्री.

(द्वितीयेऽङ्के द्वितीयं प्रेक्षणकम्)

अयोध्यावीथी। अस्तमयानन्तरम्।

[महान् स्त्रीपुरुषात्मकजनसङ्घः आक्रोशन् वर्तते।]

प्रथमः पौरः— गृह्णीत गृह्णीत ताम्। छिन्द्याम, शकलीकुर्याम।

द्वितीयः— तां कुब्जां इत्वरीम्।

तृतीयः— निपातयत ताम्, निर्दहत ताम्।

तुरीयः— तां अभिचारपरां पिशाचीम्।

पञ्चमः— प्रहरत पादेन। घ्नत असिना।

षष्ठः— इयं श्रीरामं सीतां च वनाय विद्रावितवती।

सप्तमः— इयमस्मन्महाराजं मारयामास ।

अष्टमः— नैव सा अद्य मोक्तव्या ।

(एवमाक्रोशति जनसङ्घे द्वौ पौरौ मन्थरां एकैकहस्ते गृहीत्वा आनयतः)

मन्थरा— का नु अहमस्मि? किंव्यापाराऽस्मि? कुतो नु मां यूयं व्यापादयन्तो वर्तध्वे? किमहं कृतवत्यस्मि?

प्रथमः पौरः— किं त्वं मन्यसे कैकेय्या विस्रम्भपात्रं मन्थरा त्वमिति वयं न जानीम इति?

मन्थरा— नाहं सैव मन्थरा ।

द्वितीयः— नूनं सैव त्वं नासि । अन्यथाभूतया त्वया भवितव्यम् ।

मन्थरा— यतः कुब्जाऽस्मि अतो मां अन्यथा गृह्णीथ ।

तृतीयः— ग्रहणं वाऽस्तु अन्यथा ग्रहणं वा । नेदानीं त्वां मोक्ष्यामः । सजीवां त्वां धक्ष्यामः ।

तुरीयः— किं त्वं न सा, या कैकेय्या मतिं विषदूषितां चकार? महाराजं दशरथं मारयामास? अस्मद्रामं सीतां च अरण्याय विद्रावयामास?

मन्थरा— सुहृदः, क्षमां जुषध्वम् । अहं विवृत्य वदामि ।

पञ्चमः— किं तत्, यत् त्वं विवृत्य वदिष्यसि? अनृतवचनानि ते नालं पापक्षालनाय । अधुना अस्मत्तः आत्मत्राणं ते अशक्यम् ।

मन्थरा— (आत्मरक्षानिराशा रुदती क्रन्दति) हा राम! हा सीते!

(तस्मिन् क्षणे पालकभटैः तदध्यक्षेण च परिवृतः रामः प्रविशति । रामं पश्यन्ती मन्थरा उच्चैस्तरां रोदिति)

रामः— किमधिकृत्य इदं सर्वम्? (अथ मन्थरेति प्रत्यभिजानन्) आम् । सेयं मन्थरा । तां प्रति किं कुर्वन्तो वर्तन्ते भवन्तः? मित्राणि, हस्तावपनयत ।

(तया आज्ञया मन्थरां गृहीतवन्तौ पौरौ तस्या हस्तौ अमुञ्चताम् । पुरस्तात् स्थितः राम इति जानती मन्थरा सद्यः दीनदीनं रुदती तस्य पादयोः पतति)

मन्थरा— परित्रायस्व परित्रायस्व मां, प्रभो! । एते जना मां अतिमात्रं पीडयन्तो वर्तन्ते, यथा मृता स्याम् ।

रामः— (मन्थरां प्रति) मा भैषीः, मन्थरे । उत्तिष्ठ; अहं त्वा परित्रास्ये ।

## ॥ वसुमान्-5 ॥

सति सौकर्ये बहवः रात्रौ शयनात् पूर्वं क्षीरं पिबन्ति। रत्नकान्तस्य गृहे सर्वेषां इदं शीलमासीत्। वसुमान् यस्मिन् दिने तद् गृहमागच्छत् तद्दिनादारभ्य तस्मा अपि निरञ्जना क्षीरं ददती आसीत्।

रात्रिभोजनानन्तरं सल्लापावसाने निरञ्जनादेव्या दत्तं क्षीरं सुखोष्णं कृत्वा पीत्वा वसुमान् सौधतलस्थं स्वशयनगृहं ययौ। एवमाचरणे स्थिते, पुत्र्याः कोमलायाः वसुमानेव अनुरूपो वर इति भर्त्रा सह सम्भाष्य निश्चयकरणानन्तरदिने निरञ्जना रात्रौ क्षीरपानकाले प्राप्ते वसुमन्तमवोचत्— आर्य, गच्छतु भवान् शयनगृहम्। क्षीरं ते तत्र आगमिष्यति, इति।

इदमाकर्ण्य वसुमान् मन्थरः तस्थौ। "अम्बां निरञ्जनां विना अन्यः कोऽपि जनः नास्ति, यः क्षीरमानयेत्। किमिति अम्बया सौधसोपानपङ्क्त्यारोहणश्रमः अनुभाव्यः" इति चिन्तयन् प्रत्युवाच— "अम्ब, यदि क्षीरं न सज्जं तर्हि कञ्चित्कालमत्र स्थास्यामि। न मे सम्प्रति निद्राभिभवः। मम गमने भवत्यैव किल क्षीरमानेतव्यम्। स श्रमो भवत्या मा भूत्" इति।

"न मे अल्पोऽपि श्रमो भविष्यति। यातु भवान् सौध" इत्यूर्जितां तदीयां वाचं श्रुत्वा सः विनयं विधेयतां च प्रदर्शयन् किमप्यनुक्त्वा सपदि शय्यागृहमगच्छत्।

कोमला स्वशयनस्थाने स्वशय्यां धूलीविगमाय प्रताड्य आस्तृणाना अवर्तत। 'वत्से' इति मातुः सम्बोधनमाकर्ण्य मुखं

परावर्त्य पृष्ठतोऽपश्यत् । स्वजननी पात्रं हस्ते कृत्वा आगच्छन्ती आसीत् । निरञ्जना पुत्र्याः समीपमेत्य ‘ वत्से, इदं नीत्वा तस्मै दत्वा क्षीरे पीते पात्रमादाय आगच्छ ’ इत्यादिदेश । स्वप्नेऽप्य-चिन्तितेयं मातुः प्रेरणा कोमलायाः कामप्यवस्थामुत्पादयामास ।

प्राप्तवयाः कोमला । वसुमानपि सौन्दर्यशाली युवा । उभयोरपि विनयपरिपालनश्रद्धातिशयो निसर्गसिद्धः । अत उभा-वपि परस्पराभिभाषणं अत्यन्तं पर्यहरताम् । यत्र कोमला अवर्तत तत्र वसुमान् नैवागच्छत् । एवं वसुमदवस्थितिस्थलं कोमला नैवागच्छत् । यदृच्छया परस्पराभिमुखमागमने जाते स वा तस्यै मार्गं दिशन्, सा वा तस्मै दिशन्ती, स्वयं दूरमपसृत्य स्थित्वा प्रतीक्षाञ्चक्रे । तस्यां गतायां सः, तस्मिन् गते सा वा ततः पर-मगच्छत् । कदाचित् उभावपि मार्गादपसृत्य अतिष्ठताम् । परस्परगमनमुद्दिश्य कतिपयक्षणप्रतीक्षणानन्तरं उभावपि मार्गमागत्य परस्पराभिमुखवर्तिनौ भूत्वा अन्तर्हासिनौ लज्जितौ चाभवताम् ।

परस्परबहुमानवन्तावपि कोमलावसुमन्तौ एवं विनयभङ्ग-प्रसङ्गस्य अल्पिष्ठमप्यवकाशं अददतौ हृदयगाम्भीर्यमरक्षताम् । निष्कल्मषचेतसावभवताम् ।

अस्यां स्थितौ मात्रा कृत आदेशः कोमलाया विस्मयं साध्वसं च जनयामास । सा मातरमपृच्छत्—

कोमला— अम्ब, ‘ तस्मै ’ इति ब्रवीषि । कस्मै ?

निरञ्जना— अयि मुग्धे, तस्मा एव । कोऽन्योऽस्ति असद्गृहे ?

को— कथं मया देयम् ?

नि— कः खलु अन्यो जनोऽस्ति, यो नीत्वा दास्यति।

को— अस्मिन्नहनि मया देयं वदसि। इतः पूर्वं को नीत्वा ददौ ?

नि— स स्वयं इहैव स्थित्वा पीत्वा उपर्यगच्छत्।

को— अस्मिन्नपि दिने स तथा करोतु। आह्वय। अवतीर्य आगच्छतु।

नि— वत्से, नायमुचितः क्रमः।

को— किमयमुचितः क्रमः, यन्मया गत्वा परपुरुषाय क्षीरदानम्।

नि— कथं परपुरुषः। स ते स्वकीयः।

मातृमुखोद्गतानि इमानि पदानि तदात्वे कोमलाया विशदमवबोधं जनयामासुः— वसुमानेव जामातृत्वेन पितृभ्यां वृत इति। सुरक्षितविनयमहाप्राकारगुप्ते तदीये मनसि तदवधि अलब्धप्रवेशो मदनः तस्मिन् क्षणे अपावृतकवाटेन महाद्वारेण सपरिवारः सोल्लासं प्रविवेश। तदानीमेव तत्र उप्तमनुरागबीजं अङ्कुरितं पल्लवितं ऐन्द्रजालिकचूतवृक्ष इव सद्यो महद्बभूव। सा अन्तर्जहर्ष। कुलदेवताः मनसा ववन्दे। अथ मातरमुवाच—

को— अम्ब, साध्वसपरवशानि मे अङ्गानि। कथं क्षीरं नयेयम्। कथं दद्याम्।

नि— वत्से, त्यज साध्वसम्। अस्माकं स्वजनः सः। धीरा भूत्वा नय। याहि।

इत्यादि अभिधाय पुत्र्याः वसुमत्परिणयाभ्युपगमचिह्नदर्शनजातहर्षा निरञ्जना तामनुनीय वसुमत्सकाशं प्रेषयामास।

# प्रकृतिभेदः

रघुः— मम पुत्रोऽद्य सायं गच्छति। तव पुत्रं त्वमपि प्रेषय। तेन सह गच्छतु। परस्परसहायौ भवेताम्।

यदुः— क्व किल गच्छति ते पुत्रः ?

रघुः— तत् किं अविदितं ते ? ( कर्णे मन्दं ) परीक्षकान् द्रष्टुम्।

यदुः— ( सावज्ञं ) किमिति ते द्रष्टव्याः ?

रघुः— अन्यथा परीक्षायां विजयः कथं भवेत् ?

यदुः— यदि प्रश्नानां समीचीनमुत्तरं अलेखि, ध्रुवो विजयः। परीक्षकदर्शनेन किं भविष्यति ?

रघुः— बुद्धिमान् तव पुत्रः। ग्रन्थचिन्तनशीलः। दत्तान् प्रश्नान् सर्वान् सम्यक् समाहितवान् भवेत्। तेन नूनं स विजेष्यत इति धैर्यमिव भवतः।

यदुः— आर्य, इदं श्रूयताम्। स बुद्धिमान् मा भूत्। ग्रन्थ-चिन्तनाशीलो मा भूत्। प्रश्नान् सम्यक् समाहितवान् मा भूत्। तेन पराजेष्यत इति निश्चयोऽपि भवतु। तथापि परीक्षकदर्शनं नाहमनुमंस्ये। अत्यन्तमकार्यमेतत्।

रघुः— दरिद्रकुटुम्बमेतत्। एकैकं दिनं महता क्लेशेन याति। असकृत् आहारं विनैव शेमहे। कमपि ' उद्योगं ' लब्ध्वा पुत्रः कुटुम्बभरणं करिष्यतीति प्रत्याशया इमं विद्याशालां प्रावेश-याम। स चेत् परीक्षायां भग्नो भवति। का गतिरस्माकम् ?

यदुः— वरं मरणम्। न परीक्षकानुग्रहेण विजयसम्पादनम्। अयोग्यं विजयिनं कुर्वन्तः परीक्षकाः पापिनो भवन्ति। अपण्डितः पण्डितः क्रियते। अनेन लोकस्य क उपकारः ? अपकारस्तु महान्।

# ॥ रामायणविभागः ॥

शिष्यः— ( दण्डप्रणामानन्तरं उत्थाय बद्धहस्तः विनीतः तिष्ठति )

आचार्यः— सौम्य, प्रहृष्यामि कुशलिनं त्वां पश्यन् । को हेतुः आगत्य तिष्ठसि ?

शि— आचार्याणां सेवनं ज्ञानवृद्धये कल्पते ।

आ— शोभना मतिः । एतां मतिं कृत्वा वयं अस्मदाचार्यान् शश्वत् सेवितवन्तः स्मः ।

शि— यदि न कार्यान्तरोपरोधः तर्हि अनुग्रहं क्रियमाणं इच्छामि ।

आ— सदपि कार्यान्तरं परित्यज्य भवदपेक्षापूरणं करिष्यामि । ब्रूहि । किमिदानीं अस्मत्तः अपेक्षसे ?

शि— अधुना प्रत्यहमहं श्रीमद्रामायणपारायणं कुर्वन्नस्मि ।

आ— परमः सन्तोषः । सर्वदा तत् कर्तव्यम् । सर्वैः कर्तव्यम् । तेन कृतेन न परं आमुष्मिकं श्रेयः, ऐहिकमपि फलं बहु भवति ।

शि— इदं इदं इति भगवतो मुखात् फलानि विशिष्य जिज्ञासे ।

आ— प्रथमतस्तावत् रसानुभवः । न हि ग्रन्थान्तरनिषेवणेन तावान् रसानुभवो भवति, यावान् रामायणपारायणेन ।

शि— सत्यमिदमस्ति महत् फलम् । अथान्यानि ?

आ— व्यवहारोपयुक्तसरलसंस्कृतपरिचयः, आत्मगुणवृद्धिः, बुद्धि-विकासः, अधर्मवैमुख्यं, धर्ममार्गाभिरुचिः, व्यवहारवैचक्षण्यं इत्यादीनि । अथ विवक्षितं वक्तु भवान् ।

शि— तत्र हि काण्डरूपेण विभागो दृश्यते ।

आ— आं अस्ति तथा विभागः । सप्त काण्डाः सन्ति ।

शि— तेषां यानि नामानि कृतानि तेषां किं निमित्तं भवितुमर्ह-तीति विमर्शे मे मतिरुदभूत् ।

आ— सम्यक् । विमर्शे प्रवृत्तिः बुद्धिमत्ताया लक्षणम् । विमर्शस्य पद्धतिः ज्ञाप्यताम् ।

शि— बालकाण्ड इति रामस्य वयोऽवस्थामालम्ब्य प्रवृत्तं नामधेयम् । अयोध्यादिकाण्डत्रयसंज्ञा स्थानविशेषमालम्ब्य प्रवृत्ता । सुन्दरकाण्ड इति गुणविशेषं निमित्तीकृत्य । सौन्दर्यं कस्य कीदृशमित्यपि चिन्तनीयम् । युद्धकाण्ड इत्यस्य निमित्तं कर्म । काण्डानां क्रममनुसृत्य कृतं नाम उत्तरकाण्ड इति । कुत इयमव्यवस्था । एकरूपं निमित्तं कुतो नाश्रितमिति चिन्ता समजनि ।

आ— किं चिन्तामात्रम् ? अथवा निश्चयोऽप्यधिगतः ?

शि— केवलं चिन्तामात्रम् । कुतोऽस्माकं तादृशी प्रज्ञा, यया निर्णयोऽधिगम्यते ।

आ— न तथा । न स प्रज्ञाया दोषः यत् केषाञ्चन विषयाणां तत्त्वं सहसा न गृह्यते । तेषां गाम्भीर्यं तत्र हेतुः । ते स्वयाथात्म्यं झटिति न प्रकाशयन्ति ।

शि— हेतुर्यः कोऽप्यस्तु । अत्र तत्त्वं मया न ज्ञायत इति परमार्थोऽयम् । अतः तदुपदिश्य मामनुग्रहीतुमर्हति भगवान् ।

आ— अनवसादेन चिरं चिन्तनेन स्वयं ज्ञास्यत एवेदम् । अथापि विलम्बाक्षमाय ते अस्मिन् विषये योऽस्मदीयो निर्णयः स ज्ञाप्यते ।

शि— अवहितोऽस्मि । दयतां भगवान् ।

आ—ब्रवीमि । श्रूयताम् । वाल्मीकेर्हृदयमेतदिति मे प्रत्ययः । राघवचरितं प्रथमं द्वेधा विभज्यते-बालचरितं, वृद्धचरितमिति । विवाहात्परं धर्माचरणयोग्यत्वात् वृद्धता भवति । पुनर्द्वेधा विभज्यते—पूर्वचरितं उत्तरचरितमिति । रावणवधानन्तरं पट्टाभिषेकपर्यन्तं पूर्वचरितम् । ततःपरं सर्वं उत्तरचरितम् । अथ यत् मध्ये वर्तमानं पूर्वं वृद्धचरितं, तत् अयोध्यायां वृत्तं, अरण्ये वृत्तं, किष्किन्धायां

वृत्तं, लङ्कायां वृत्तं इति चतुर्धा विभज्यते। लङ्कावृत्तं द्वेधा भवति— अयुद्धात्मकत्वात् सीतोपलब्धिरूपत्वाच्च सुन्दरं, घोरयुद्धात्मकं चेति। एवं सप्तधा विभागात् रामचरितवृक्षस्य सप्त काण्डा भवन्ति। तेषां क्रमेण बालकाण्डः, अयोध्याकाण्डः, अरण्यकाण्डः, किष्किन्धाकाण्डः, सुन्दरकाण्डः, युद्धकाण्डः, उत्तरकाण्ड इति नामानि भवन्तीति युक्तमिदम्।

## ॥ लोकवार्ता ॥

विहार (बीहार) प्रदेशे अतिप्रवृद्धैः जलप्रवाहैः महती पीडा अजनीति श्रूयते। कृत्स्ना ग्रामा विनष्टाः। बहवो जना मृताः। बहुषु ग्रामेषु भूयिष्ठानि गृहाणि पतितानि।

दामोदरनाम्न्यां नद्यां पञ्चविंशतिं जनान् वहन्ती नौका सरसकुण्डनलाभिधानग्रामसमीपे झटिति उद्भूतया वात्यया अभिहता ममज्ज। त्रयोविंशतिर्जनाः बाहुभ्यां प्रवाहं तीर्त्वा तीरमासेदुरिति, अन्ये मृताः, तेषां शवा उत्तारिता इति च ज्ञायते।

कलकत्ता-सन्निहिते 'महेश'पुरे अस्मदीयं व्योमयानमेकं ज्वलितं विशीर्णमभूत्। सारथ्ये स्थितास्त्रयोऽपि मृताः। यत्र यानं पतितं तत्र त्रयः शिशवः अन्ये च चत्वारः व्रणिता अदृश्यन्त। वैद्यशालां नीतेषु तेषु द्वौ संस्थितौ।

ईदृश्यो वार्ताः प्रत्यहं बहुशः बहुविधाश्च श्रवणपथमागच्छन्ति। न केवलमेताभिरेव, अपि तु "अधर्माभिवृद्धेरिमानि फलानि। तन्निरोधेन धर्माभ्युदयं प्रति तीव्रो यत्नः कार्यः" इति यत् जना वा नेतारो वा न जानन्ति तेनापि वयं अत्यन्तं विषण्णाः स्मः। [सं. 14-10-61]

समष्टिशासने स्थितैः संस्कृताभ्युदयमुद्दिश्य तिरुपतिक्षेत्रे काचन शाला स्थापनीयेति निरचायि। भाविनि डिसम्बर्-मासे कार्योपक्रमो भविष्यति इति, प्रथमं अध्यापनशिक्षा प्राचीनग्रन्थविमर्श इत्युभयोः संविधानं करिष्यत इति च वदन्ति।

# ॥ श्री लक्ष्मीपञ्चाशत् ॥

विद्याभूषणं, चिलुकूर् मा. वेङ्कटराघवाचार्यः, शिरोमणिः।

कण्ठादुपरि मृगेन्द्रं वैकुण्ठाख्यं रमापतिं वन्दे।
लुण्ठितभक्तजनाघं कुण्ठितदैत्यं कयाधुतनयेडयम् ॥ १ ॥

भास्वन्नखरमुदारं भास्वत्समतेजसं त्रयीमूर्तिम्।
निशितप्रचण्डतुण्डं पिशिताशघ्नं नमाम्यहं तार्क्ष्यम् ॥ २ ॥

छन्दांस्यङ्गानि विदुर्बृहदिति साम्नी रथन्तरञ्चेति।
पक्षौ यस्येत्यूचुर्वेदाः प्रणमाम्यहं सुपर्णन्तम् ॥ ३ ॥

सिंहाचले नृसिंहो वेगक्रान्तं रणात्समायान्तम्।
यमपाययत्तमीडे पीयूषं पाणिना पतत्रीशम् ॥ ४ ॥

शेषावतारमार्यं मायिमतध्वान्तभञ्जनादित्यम्।
यतिराजराजमीडे केशवपादाब्जलग्नहृत्पद्मम् ॥ ५ ॥

वैराग्यवार्धिमीडे विष्णोर्घण्टावतारमाचार्यम्।
स्वातन्त्र्यं तन्त्रौघे यः प्रापोर्व्यामनन्यलभ्यन्तम् ॥ ६ ॥

शरणं भवभीतानां, वण्शठकोपन्तमादिमं वन्दे।
यदुपज्ञं लोकेऽस्मिन् प्रथितो मालोलपादुका (विभवः) महिमा ॥ ७ ॥

विद्वद्वरेण्यमीडयं विद्वद्भिर्मन्त्रशास्त्रवेत्तारम्।
शठरिपुकारिजदृष्टं वन्दे रङ्गेशकारिजाचार्यम् ॥ ८ ॥

सज्जनशिरस्सरोजैर्मण्डितपदपङ्कजद्वयं दिव्यम्।
मानृहरिकारिसूनोः प्रतिफलतान्मे सदा हृदादर्शे ॥ ९ ॥

Registered No M 2300.

Book XXXIII ॥ श्रीः ॥ Nos. 11-12

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

—:o:—

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३३] कलि ५०६१ प्लव— कटक-सिंहौ [सं ११-१२

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

JULY & AUGUST 1961.

In case you have not received the previous number please inform the Editor or Publisher immediately.

पत्रिकामूल्यं निश्शेषं प्रेष्य उपकर्तव्यम् ।

Kindly help the poor journal by sending the arrears of your subcription

For the rate of subscription please see inside.

# UDYANA PATRIKA.

Annual Subscription: Rs. Three only.
Foreign Twelve Indian Rupees.

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं त्रीणि रूप्याणि ।

२ ग्राहकीबुभूषद्भिर्दययया प्रथममेव मूल्यं प्रेषणीयम् ।

३ वर्षमध्ये ग्राहकीभवतामपि कन्यासङ्क्रिकादिरेव पत्रिका प्रेष्येत ।

४ एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

५ प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

६ एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

७ लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयाः ॥

1 सत्यम्-3 ।
2 मुकुन्दमाला ।
3 वसुमान्-6
4 श्री लक्ष्मीपञ्चाशत् ।

गीतार्थदीपः । ३२५–३२८
The Githartha Sangraha—29-32.

॥ उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधः खेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु ३३] कलि ५०६२ प्लव- कटक-सिंहौ [सं ११-१२
(1961–July–August)

# ॥ सत्यम् - 3 ॥

इतः पूर्वं सञ्चिकाद्वये सत्यमधिकृत्य किमप्यवोचाम। पुनरपि किञ्चिदिदानीं उच्यते ।

"सत्यं परं परं सत्यम्" इति श्रुतिः सत्यस्य सर्वोत्कृष्टत्वं स्वयमुपदिदेश। तावता अतृप्यन्ती पुनः 'प्राजापत्यो ह्यारुणिः' इति कथामुखेन तस्य परमत्वं प्रतिपादयामास। अत्र तात्पर्योपलम्भे अस्माभिर्यत्नः कार्यः ।

"भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति।" इति ब्रह्मविद्याप्राप्तये पुत्रस्य शिष्यस्य पितरं आचार्यं प्रति उपगमनं अन्यत्र आम्नायते। तद्वदेवात्र। तेन जगत्कारणब्रह्मज्ञानं यथा मनुष्याणां आवश्यकं तथा सत्यज्ञानमपीति ज्ञाप्यते। यथा आचार्योपदेशात् तत् अधिगन्तव्यं, तथैव इदमपीति च कथां कथयन्त्याः श्रुतेरभिप्रायः ।

अथ अन्यदप्यत्र अवधेयम्। शिष्यः 'किं परमं' इति न पृच्छति। आचार्यश्च 'सत्यं परमं' इति न प्रतिवदति। अपि तु 'किं भगवन्तः परमं वदन्ति' इति शिष्यस्य प्रश्नः। 'सत्यं परमं वदन्ति' इत्याचार्यस्य प्रतिवचनम्। अनादिकालात् गुरुपरम्परया उपदिश्यमानं उत्तमं श्रेयस्साधनं किमिति प्रष्टुरभिप्रायः। तमवगम्य 'सत्यं तथाविधं श्रेयस्साधनं' इति प्रतिवक्ता ब्रवीति ।

अतः अस्याः कथाया मुखेन, जनैः प्राज्ञान् उपसृत्य सत्यस्य महिमा जिज्ञासितव्यः। प्राज्ञैश्च स तेभ्यः सम्यगुपदेष्टव्यः" इति श्रुतिरियं आदिशति। एतदनुसारेण प्राञ्चो जनाः विद्वद्भिः बहुधा बोधितं सत्यस्य

वैभवं सम्यक् जानन्तः तन्निष्ठा अभवन् । राजानः तत्र मार्गदर्शिनोऽभवन् । रघुकुलभवा भूपतयः 'सत्याय मितभाषिणः' आसन्निति महाकविः कालिदासो वदति । सत्यपरो हरिश्चन्द्रः, राज्यस्य, दाराणां, पुत्रस्य, सर्वस्य हानिं सेहे ।

दशरथः अनृतभयात् क्लेशलब्धस्य प्रियस्य पुत्रस्य वनवासं अन्वमन्यत । पितरं सत्यवाचं कर्तुं श्रीरामः आत्मनो यौवराज्याभिषेकमनिच्छन् सीतालक्ष्मणाभ्यां सह ससन्तोषं अरण्यवासं चिरमकरोत् ।

अथेदं पर्यालोचनीयम् । कुतो नाम एतावत् प्राधान्यं प्राचीनैः सत्यस्य अदीयत ? महदत्र कारणम् । सत्यं परमो धर्मः । सत्यपरित्यागे, असत्यभाषणे, धर्मो नाशितो भवति । अधर्मः कृतो भवति । तेन देवाः कुप्यन्ति । तेऽपि सत्यात् प्रच्यवन्ते । ततोऽस्माकं बहुधा बह्वी पीडा भवति ।

भुवः स्थिरत्वं सत्यम् । तद्विहाय सा कम्पते । पर्जन्यस्य काले यावदपेक्षं वृष्टिपातनं सत्यम् । तदकुर्वन् सः नैव वर्षति । अथवा अतिवर्षति । अशनिं पातयति । अश्मवर्षं वर्षति । अग्नेः अन्नपचनप्रकाशदानादिमात्रं सत्यम् । तदतिरेकेण सः गृहान् वस्तूनि प्राणिनश्च दहति । एवं वातः प्रबलो भवन् बाधते । यमः नवान् नवान् रोगान् उत्पाद्य हिनस्ति ।

अतः सर्वैः सत्यनिष्ठैर्भाव्यम् ।

# मुकुन्दमाला ॥

क्षीरसागरतरङ्गशीकरा-
सारतारकितचारुमूर्तये ।
भोगिभोगशयनीयशायिने
माधवाय मधुविद्विषे नमः ॥ ३९ ॥

यावत् मनः प्रसन्नं भवति तावत् शय्यायामुपविष्टैः भगवच्चिन्तनं कार्यम्। अथ निद्रोपगमे शयितव्यम्। तदानीं क्षीरसागरे नागपर्यङ्क-शायी माधवश्चिन्तनीयः। एतदभिप्रेत्याह— क्षीरसागरेत्यादि।

क्षीरसागरस्य ये तरङ्गाः ऊर्मयः, तेषां तत्सम्बन्धिनः ये शीकराः पाण्डराः पयःकणाः तेषां यः आसारः धारासम्पातः तेन तारकिता सञ्जाततारका, अङ्किता, अत एव चारुः मूर्तिः वपुः यस्य तस्मै। श्यामले भगवद्वपुषि निबिडपतिताः क्षीरकणाः गगने तारका इव भासमानाः वपुषः परभागं जनयन्तीति भावः।

भोगिनः सर्पराजस्य भोग एव शयनीयं तल्पं तस्मिन् शेते, तस्मै।

माधवाय। लक्ष्मीकान्ताय। देव्या श्रिया संवाह्यमानपदपङ्कजायेति हृदयम्।

मधुविद्विषे। मधुसूदनाय। न लौकिकी बोधविहतिकरी भगवतो निद्रा। अपि तु योगनिद्रा। निमीलितनेत्रः शयानोऽपि भगवान् भक्त-जनप्रतिकूलोन्मूलनचिन्तानिरन्तरस्वान्त इति व्यज्यते।

नमः। मामर्पयामीत्यर्थः।

एवं भगवन्तं स्मृत्वा शयित्वा सुप्त्वा प्रभाते प्रबुद्धैः 'श्रीवल्लभेति' 'हे गोपालक', 'श्रीनाथ नारायण' इति तन्नामसङ्कीर्तनं कर्तव्यम्। तदत्रायं स्तुतिनिबन्धः समाप्तः। अथान्ते स्वस्य एतत्स्तुतिकरणयोग्यता-सम्पत्तिर्यदधीना तयोर्द्वयोर्नाम, कीर्त्यनुवृत्तये स्वनाम च कीर्तयति— यस्य प्रियावित्यादि।

यस्य प्रियौ श्रुतधरौ कविलोकवीरौ
मित्रे द्विजन्मवरपद्मशरावभूताम्।
तेनाम्बुजाक्षचरणाम्बुजषट्पदेन
राज्ञा कृता कृतिरियं कुलशेखरेण॥ ४० ॥

प्रियौ। दर्शनमात्रेण गुणैश्च प्रीतिजनकौ। श्रुतधरौ शास्त्रेषु निष्णातौ। कविलोकवीरौ कविसमुदायश्रेष्ठौ। द्विजन्मवरपद्मशरौ विप्रवरौ पद्मः शर इति नामधेयवन्तौ द्वौ। यस्य मित्रे सुहृदौ अभूताम्, तेन भगवत्पदकमलचञ्चरीकेण इयं मुकुन्दमालानाम्नी चत्वारिंशच्छ्लो-कात्मिका कृतिः कृता।

प्रियावित्यनेन गुणपौष्कल्यद्वारा कुलीनता परोपचिकीर्षा च व्यञ्जिता । मित्रे इति सौहार्दम् । वेदान्तपर्यन्तसकलशास्त्रपारगौ तौ द्वौ दयया प्रीत्या च "परतत्त्वं श्रीकृष्णः । तच्चरणारविन्दभजनं निश्श्रेयसस्साधनं" इति बोधयित्वा मम तत्र दृढां भक्तिमुत्पाद्य रमणीयस्तुतिकाव्यनिर्माणशिक्षामप्यदत्ताम् । सोऽहं राजा सन् प्रजानां हितमुद्दिश्य इमं स्तोत्रनिबन्धमकार्षम् ।

इच्छायां सत्यां इमं मुखस्थं कृत्वा प्रतिदिनं अनुसन्धाय जनाः सर्वश्रेयोनिदानं भगवत्कटाक्षवीक्षणलक्ष्यभावं भजन्तामिति भावः ।

॥ इति मुकुन्दमाला ॥

घुष्यते यस्य नगरे रङ्गयात्रा दिने दिने ।
तमहं शिरसा वन्दे राजानं कुलशेखरम् ॥

# ॥ वसुमान्-6 ॥

दक्षिणेन हस्तेन क्षीरपात्रमादाय कोमला (ललिता) शनैः सोपानान्यारोढुमारभत । साध्वसं तां न विजहौ । पादौ न प्रासरताम् । हस्तोऽकम्पत । किं नाम क्षीरमपवर्जितं भवेदिति शङ्कमाना निरञ्जना अनुद्रुत्य पयोभाजनं स्वयं जग्राह । तद् वामहस्तेन धारयन्ती "जाते, कथमेवं अधीराऽसि । न खलु सः अन्यो यः कोऽपि । अस्मद्गृहे चिरमुषितः बन्धुजननिर्विशेषो हि सः । आश्वस्ता गच्छ ।" इति वदन्ती दक्षिणहस्तेन तस्या अङ्गं परामृशन्ती तां पर्यवस्थापयामास । क्षीरभाजनं च पुनः तस्यै ददौ । तद् गृहीत्वा कथञ्चित् धैर्यमालम्ब्य कोमला प्रातिष्ठत । भावशतशबलचित्ता अतिमन्दमगच्छत् ।

दुग्धमदत्त्वैव आत्मानं सौधतलं प्रेषितवत्या निरञ्जनाया अभिप्रायमनवगच्छन् अनन्येन मनसा तमेव तर्कयन् चतुष्पद्यामुपविष्टो वसुमान् सोपानद्वारादागच्छन्तीं कोमलां दृष्ट्वा प्रथमं सम्भ्रान्तो बभूव। ततः 'बुद्धिपूर्वमेषा मात्रा स्वसमीपं प्रेषिता' इति जानन् सम्भ्रमं जहौ। अथापि अत्यन्तं सम्भ्रान्त इव तामुवाच— "किमेतत्। कथमेवं कृतवत्यसि। एकाकिनी एकान्ते मामुपगताऽसि। इदं किल आवां प्रति शङ्कामुत्पादयेत्। सपदि प्रतियाहि।................"

कोमला मज्जन्तीं वाचं यत्नादुद्गमय्य मन्दस्वरं प्रत्युवाच— "अम्बा मां प्रेषयति।"

वसुमान्— अम्बा त्वां प्रेषयति! साधु। किमर्थम्?

कोमला— पयो दातुम्।

वसु— न न। अहं प्रतिजाने। प्रत्यहं सा मे पयो ददाति। अधस्तात् महानस एव ददाति। अहं तत्रैव पीत्वा आगच्छामि। अस्मिन् दिने परं किं नाम तदर्थं त्वमिह प्रेषणीया? त्वया वा सौधारोहणपरिश्रमोऽङ्गीकार्यः?

को— इदं क्षीरं प्रत्यक्षं मे हस्ते वर्तते। इदं मम हस्ते दत्त्वा अम्बा मामवोचत्—"इदं नीत्वा देहि" इति। अत आगताऽस्मि।

वसु— एवं त्वां प्रेषयन्त्या अम्बायाः कोऽभिप्रायः?

को— नाहं तं जानामि।

वसु— अहं युवा। त्वं विवाहोचितं वयः प्राप्ता। ईदृशीं त्वां मत्समीपं एकान्ते प्रेषयन्त्या अम्बाया मतिः किं दुर्ग्रहा?

को— (उद्गतं सितं नियच्छन्ती) या कापि मतिर्भवतु। किमिदानीं तया विदितया उदितया वा।

वसु— महदस्ति कार्यं तया विदितया कथितया च।

को— तर्हि श्रोतुमिच्छामि।

वसु— वक्तारं मां वाञ्छसि, न श्रोतारम्। अथवा स्त्रीभावोचिता लज्जा त्वां नियन्त्रयति। अहं ब्रवीमि, शृणु। न केवलं क्षीरं, त्वामपि मे दातुमिच्छति अम्बा। तत्कारणं यत् त्वमद्य क्षीरवहा मत्सकाशं प्रेषिता।

को— (कञ्चित्कालमधोमुखी स्थित्वा) भवतु। मातुरभिप्राय इदानीं विदितः। ततः किं कर्तव्यम्? इदं तु झटिति कर्तव्यं यत् पयसः पानम्। तद्धि शीतीभवति।

वसु— अन्यस्मिन् लोकोत्तरे पयसि पीयमाने, सर्वसामान्ये गोपयसि कस्य आदरो भवति?

को— किं तत् लोकोत्तरं पयः?

वसु— तत् यत् तव वाचा दुह्यते, मम श्रोत्रेण च पीयते। अथापि तव प्रणयभङ्गो मया न कार्यः। देहि पिबामि। (कोमला ददाति। वसुमान् पीत्वा भाजनं तस्यै प्रत्यर्पयति।)

वसु— अद्य मधुरतरं पयः।

को— नूनं शर्करा अधिका।

वसु— न न। तव करपल्लवस्पर्शेन।

को— कामिनामियं वचनभङ्गी।

वसु— कः खलु निष्कामो जगति?

को— गच्छामि। विलम्बे अम्बा किमपि मन्येत।

वसु— किं मन्येत ?

को— अहमतिप्रसक्तेति।

वसु— न। नाहं तथा मन्ये। तवात्र अतिप्रसङ्गः तस्यै हर्षाय कल्पेत। स तस्याः अत्यन्तमिष्टः। प्रत्युत तव झटिति गमने सा किमपि मन्येत।

को— किं मन्येत ?

वसु— न ते मय्यनुराग इति।

को— न। नाहं तथा मन्ये। अनुरागविरहे किमहं अत्र आगतवती स्याम् ?

वसु— (सस्मितं) निपुणं भाषसे। किन्तु प्रधाने एकस्मिन् विषये अनैपुण्यं ते दृश्यते।

को— कस्मिन् विषये ?

वसु— अहं ते अननुरूपो वर इति विवेके।

को— (स्मितं कृत्वा) इदमनैपुण्यं मे यावज्जीवमनुवर्तमानं अहं कामये।

वसु— गर्भश्रीमती त्वम्। गर्भदरिद्रोऽहम्। केवलमन्नार्थी इह वसामि। समयोरेव विवाहो विवादो वा शोभते।

को—लक्ष्मीश्चेत् स्वयं वृणुते, क्व स्थास्यति दारिद्र्यम् ? सद्यः कुबेरसमगणनां नरो लभते। अपि च वित्त-सम्पत्तिमपेक्ष्य गुणसम्पत्तिर्गरीयसी।

वसु— सम्यक् चिन्तय। ततो निश्चयं कुरु। अन्यथा प्रबलः पश्चात्तापो भवेत्।

को— काऽहं चिन्तनाय वा निश्चयाय वा। यं मे मातापितरौ वृणुतः, स मे पतिः, स मे कान्तः, स मे दैवतम्।

वसु— ममाप्यनतिक्रमणीयवचनौ तौ।

को— तर्हि सर्वं निश्चितम्। किमावयोर्विमर्शेन। गच्छामि।

वसु— (जवादुत्थाय तामनुसरन्) किं गमिष्यसि?

को— मा मा। स्थातव्यम्। अम्बा पश्यन्ती वर्तते।

एवमभिधाय पश्चात्परावृत्य पश्यन्ती कोमला मन्दगति सौधादवरुरोह। वसुमान् कथञ्चित् तदनुसरणादात्मानं निरुध्य शयितः चिरं निद्रां न लेभे।

---

## ॥ श्री लक्ष्मीपञ्चाशत् ॥

विद्याभूषणं, चिलुकूर् मा॰ वेङ्कटराघवाचार्यः, शिरोमणिः।

वादाहवेषु दक्षं मायिद्विरदौघकुम्भसम्भेदे।
सिंहं विद्वन्मकुटं वन्दे श्रीरङ्गकारिजाचार्यम्॥ १० ॥

त्वरते मनो मदीयं नरहरिवामाङ्कगे रमे द्रष्टुम्।
नगरेऽपराजिताख्ये शुभे त्वदीये पदाम्बुजे दिव्ये॥ ११ ॥

अज्ञानाम्बुधिमग्नं करुणाशङ्खेन पायय त्वम्माम्।
चैतन्यदुग्धधारां न ते जनेऽस्मिन् दयास्ति किम्मातः॥ १२ ॥

महिमाऽसीमा मे ते न भवत्या नापि विष्णुना ज्ञातः।
सर्वज्ञत्वहतिर्वां न तथापि यतो न तादृशं वस्तु॥ १३ ॥

சரீரமானது— ப்ரக்ருதி மஹான் தாமஸாஹங்காரம், ப்ருதிவீ முதலிய ஐந்து மஹாபூதங்கள். ஆகிய இவைகளாலுண்டானது. இந்திரியங்கள் பதினொன்றுக்கும் ஆச்ரயமானது. இச்சை த்வேஷம் ஸுகதுக்கங்கள் அதனிடமிருந்து உண்டாகின்றன. இச்சேதனன் ஸுகதுக்கங்களை அநுபவிப்பதற்கும் பரலோகத்தை ஸாதிப்பதற்கும் தான் ஆதாரமாயிருப்பது இந்த சரீரத்திலேயே. ப்ருதிவீ முதலிய ஐம்பூதங்களின் சேர்க்கையே இச்சரீரம். இப்படி சரீரத்தின் தத்துவத்தை அதன் கார்யங்களுள்பட உனக்கு நான் சொன்னேன்.

४९५ अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥

पूर्वं क्षेत्रज्ञादपि पश्चाज्ज्ञानोद्देशेऽपि तत्साधनानामनुष्ठेयानामिच्छादिवत क्षेत्रकार्यत्वात् तदनन्तरमिहोपादेया गुणाः प्रोच्यन्ते पञ्चभिश्श्लोकैः—

अमानित्वं- विद्याभिजनादिमूलकः, उत्कृष्टजनावमानहेतुर्गर्वो मानः ; तद्रूपस्वरूपस्य मानित्वस्य अभावः अमानित्वम्, अदम्भित्वम्- धार्मिकत्वयशःप्रयोजनकतया धर्मानुष्ठानं दम्भित्वम्, तदभावः अदम्भित्वम्, अहिंसा- वाङ्मनःकायैः अनर्थैकफलपीडारूपो व्यापारः हिंसा तद्रहितत्वं अहिंसा। क्षान्तिः- परैः पीड्यमानस्यापि तान् प्रति अविकृतचित्तत्वम्, आर्जवम्- परान् प्रति मनोवाक्कायकर्मणामैकरूप्यम । आचार्योपासनं- आचार्यस्य-तत्त्वज्ञानप्रदायिनः, उपासनं-प्रणिपातपरिप्रश्नादिभिः सेवनम। शौचम्- रागादयः अनृतादयः निषिद्धभक्षणादयश्च मनोवाक्कायानां अशुद्धयः तद्राहित्यरूपा आत्मज्ञानतत्साधनयोग्यता, स्थैर्यं- अध्यात्मशास्त्रोदितेऽर्थे निश्चलत्वम्, आत्मविनिग्रहः- आत्मनः- मनसः, विशेषेण निग्रहः आत्मस्वरूपव्यतिरिक्तविषयेभ्यो निवर्तनम् ।

சரீராத்மாக்களைப்பற்றிய தெளிவு பெறுவதற்கு வேண்டிய குணங்களாவன:— மேலானவர்களை அவமதிக்குமதாகிய அஹங்காரமின்மையை ஸம்பாதிக்கவேண்டும், தார்மிகன் என்கிற புகழையுத்தேசித்து தர்மாநுஷ்டானம் செய்யலாகாது. மனோவாக்காயங்களால் எவரையும் பீடை செய்யலாகாது.

பொறுமை வேண்டும். மனோவாக்காயங்கள் மாறுமல் ஏகரூபமாயிருத்தல் வேண்டும். வேதாந்தசாஸ்த்ரோபதேசம் செய்தவாசார்யனை சுச்ரூஷை செய்யவேண்டும். தகாத விஷயத்தில் ஆசை பொய் நிஷித்தபோஜனம் முதலிய அசுத்தியற்று சாஸ்த்ரம் சொன்ன அர்த்தங்களில் உறுதியுடையனாய் மனதை மற்றதிலிருந்து கட்டுப்படுத்தல் வேண்டும்.

४९६ इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्॥

इन्द्रियार्थेषु- इन्द्रियाणां अर्थाः- आत्मव्यतिरिक्ताश्शब्दादिविषयाः तेषु वैराग्यं- विरागस्य भावो वैराग्यं सदोषत्वानुसन्धानेनोद्वेजनम्, अनहङ्कार एव च-अनात्मनि देहे 'अहं' इत्यात्माभिमानरहितत्वम, जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्- जन्मादिरूपं जन्मादिजन्यं वा यत् दुःखम् स एव दोषः तस्य अनुदर्शनम्-भूयोभूयोऽनुसन्धानम्, गर्भवासादिकं जन्मदोषः, मृत्युदोषः स्फुटः। प्रज्ञाशक्त्यादिनिरोधो जरादोषः, शिरोरोगादिदुःसहत्वं व्याधिदोषः, तत्तदालोचनं आत्मज्ञानोपयोगि।

ஆத்மாவைத் தவிர்த்து மற்றுள்ள சப்தாதிவிஷயங்களில் வெறுப்பும், உடலில் யான் என்கிற ஆத்மாபிமானமின்மையும், பிறவி, மரணம், கிழத்தனம், வியாதி இவைகளால் உண்டாகுமவையான தோஷங்களை அநுஸந்தானம் செய்வதும் ஆத்மஜ்ஞானத்திற்கு வேண்டிய குணங்கள்.

४९७ असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥

असक्तिः- आत्मव्यतिरिक्तविषयेषु प्रीत्यभावः, पुत्रदारगृहादिषु— पुत्रेषु दारेषु गृहेषु च दासवर्गादिषु च अनभिष्वङ्गः अत्यासक्त्यभावः शास्त्रीयकर्मोपकरणत्वातिरेकेण श्लेषरहितत्वम्, इष्टानिष्टोपपत्तिषु- इष्टानां अनिष्टानां च उपपत्तयः- प्राप्तयः तासु, नित्यं च- सर्वदापि, समचित्तत्वम् हर्षोद्वेगराहित्येन तुल्याभिप्राययुक्तत्वम्।

ஆத்மஜ்ஞானத்திற்கு உபயோகமில்லாதவற்றில் பற்றுதலில்லாமையும், புத்ரன், மனைவி, க்ருஹம், வேலைக்காரன் முதல

லியவர்களிடம் விசேஷாபிமானமின்மையும், இஷ்டமானது நேர்ந்தால் ஸந்தோஷமும், அநிஷ்டமானது நேரும்பொழுது துக்கமுமில்லாமல் எப்பொழுதும் ஒரேவிதமான மனம் பெற்றிருப்பதும் ஆத்மஜ்ஞானத்திற்கு உபாயமாகும்.

४९८ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।
विविक्तदेशसेवित्वमरतिर्जनसंसदि॥

मयि च- सर्वेश्वरे, अनन्ययोगेन- अन्यः- वासुदेवातिरिक्तः उपायोपेयभावेन विषयतया यस्य न विद्यते सः अनन्यः स चासौ योगः- बुद्धिः अनन्ययोगः तेन, अव्यभिचारिणी- स्थिरा, भक्तिः- महनीयत्वानुसन्धानजन्या प्रीतिः, विविक्तदेशसेवित्वम्- विविक्तः- स्वभावतः संस्कारेण वा अशुच्यादिभिः चोरादिभिश्च भयानकैः रहितः, देशः- अरण्यनदीपुलिनदेवगृहादिः, तं सेवितुं शीलं अस्य इति विविक्तदेशसेवित्वम्, जनसंसदि जनानां प्राकृतानां, संसत्- समवायः तत्र अरतिः- अरमणम्।

என்னைத் தவிர்த்து உபாயமும் ப்ராப்யமும் வேறில்லை என்றெண்ணி என் பக்கல் உறுதியான பக்தியும் ஏகாந்த ஸ்தல வாஸமும் பாமரஜனகோஷ்டியில் பற்றுதலில்லாமையும் ஆத்மஜ்ஞானோபாயமாகும்.

४९९ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थचिन्तनम्।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा॥

अध्यात्मज्ञाननित्यत्वम्- आत्मनि ज्ञानं अध्यात्मज्ञानं तस्मिन् नित्यत्वम्- निष्ठा, तत्त्वज्ञानार्थचिन्तनं- तत्त्वज्ञानं अर्थः- प्रयोजनम् यस्य तत् चिन्तनं- तन्निरतत्वं, एतत्- अमानित्वादि तत्त्वज्ञानार्थचिन्तनान्तं, ज्ञानं इति- ज्ञायते अनेन इति ज्ञानं आत्मज्ञानसाधनं इति, प्रोक्तम्- प्रकर्षेणोक्तम्, अतः एतस्मात् अमानित्वादेः, अन्यथा- विपर्ययेण, मानित्वं दम्भित्वं हिंसा अक्षान्तिः इत्यादिकं, अज्ञानं- आत्मज्ञानविरोधि।

ஆத்மஜ்ஞானமொன்றிலேயே நிலை பெற்றிருத்தல் வேண்டும், தத்வஜ்ஞானத்தையே ப்ரயோஜனமாகக்கொண்டு ஊன்றியிருத்தல் வேண்டும். இப்படி அமாநித்வம் முதலிய இவையே

ஆத்மஜ்ஞானத்திற்கு உபாயமென்று சொல்லப்பட்டது. இதற்கு மாறுதலான அஹங்காரம் டம்பம் முதலியவை ஆத்மஜ்ஞானவிரோதிகள்.

५०० ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ।
अनादि मत्परं ब्रह्म न सत्तन्नासदुच्यते ॥

वेद्यविशेषस्यात्मनो लक्षणतया वेदितृत्वं प्रागुक्तम् 'एतद्यो वेत्ति' इति। तदेवामानित्वादिभिस्साधनैः ज्ञेयं क्षेत्रज्ञस्वरूपं विशोध्यते— यत्- जीवस्वरूपम्, ज्ञेयम्- अमानित्वादिभिः पूर्वोक्तसाधनैः ज्ञातव्यम्, यत्, ज्ञात्वा, अमृतं- जन्ममरणादिरहितमात्मानं, अश्नुते- प्राप्नोति तत् प्रवक्ष्यामि- प्रकर्षेण यथावद्वक्ष्यामि, अनादि- न विद्यते आदिः यस्य तत् अनादि- उत्पत्तिरहितम्, मत्परं- अहं परः शेषी- यस्य तत् मत्परम्, ब्रह्म— स्वरूपाविर्भावदशायां धर्मभूतज्ञानविकासरूपबृहत्त्वगुणयोगि, स्वरूपं ह्यणु. अतो बृहत्त्वं धर्मभूतज्ञानद्वारा। एवम्भूतं तत्- जीवस्वरूपम्, सत् न उच्यते देवादिनामरूपभाक्त्वरूपकार्यावस्था हि सत्त्वं तदनर्हतया शुद्धस्वरूपं सदिति नाभिधीयते, असत् न उच्यते- देवादिनामरूपरहिता सूक्ष्मकारणावस्था असत्वं तदभावात् शुद्धस्वरूपं असदिति च नोच्यते, क्षेत्रज्ञस्य दर्शितरूपं कार्यकारणावस्थाद्वयं हि कर्मकृतम्। अतः परिशुद्धस्वरूपं तु 'सत्' इति 'असत्' इति च नोच्यते; कर्मणोऽसम्बन्धात्।

அமாநித்வம் முதலிய கீழ்ச் சொல்லிய குணங்களை ஸாதநங்களாகக்கொண்டு அறியப்படவேண்டியது ஆத்மஸ்வரூபம். அவ்வறிவினால் சுத்தமான ஜீவஸ்வரூபத்தை அடையலாம். அது உத்பத்தியும் அழிவுமில்லாதது. எனக்கு சேஷபூதமானது. மோக்ஷதசையில் தர்மபூதஜ்ஞானவிகாஸமுடையது. கர்மஸம்பந்தமுடைய ஆத்மாவை தேவன் மனுஷ்யன் என்றாற்போல் பிறப்பதாகிய கார்யநிலையைவிட்டு 'ஸத்' என்றும், ஸூக்ஷ்மமான காரணநிலையைவிட்டு 'அஸத்' என்றும் சொல்லுவதுண்டு. கர்மஸம்பந்தமற்ற பரிசுத்தமான ஆத்மஸ்வரூபத்திற்கு இரண்டு நிலைகளுமில்லாமையால் அதை 'ஸத்' என்றும் 'அஸத்' என்றும் சொல்லுவதில்லை.

This means that though as one that knows and wills and has the volitional move, the soul could be considered the agent, still it is not to be considered so, since all that it does during all the time of its bondage is due to and entirely dependent upon its body and organs. A god and a man, a king and a servant, a father and a son, a friend and a foe, all these behave differently and this difference in their behaviour is due to the difference in their consciousness about themselves. But take and consider all these souls in an abstract manner, *i. e.*, apart from the bodies etc. There is nothing in themselves which would be responsible for the difference in their behaviour as god, man, and others. This fact about their true nature is not realised by the souls because their knowledge is restricted, covered, suppressed, by their beginningless *karma*. When this *karma* is destroyed by the soul experience brought about directly by *karma-yoga*, all restrictions over knowledge would go when it would reveal their true nature fully and clearly.

(*c*) Souls are knowers. They possess knowledge. Besides they are themselves *knowledge*. All things other than knowledge are revealed, *i. e.*, are made known to us by knowledge. 'We know this' means 'we have knowledge of this': 'we have grasped this through knowledge.' Things other than knowledge cannot present themselves to us, to our mind, except through knowledge. They can remain in themselves without being known to any body. But they become things known, only when one has got the knowledge of them. But now take 'knowledge' itself. Does it, like other things, necessarily require any other knowledge for being known ? Is there any instance of knowledge which having happened, remained without being known at the same time ? Just as light unlike other things in the dark does not require another light to make itself known so

knowledge does not require another knowledge to make it known to the soul to which it belongs. It is *svayam-prakasa*–self-illumined. Now it may be seen that knowledge could be defined as that which is capable of making itself known without the aid of any thing else. Applying this definition to the soul we have no difficulty in understanding that it also is knowledge, because it makes itself known even when there is no knowledge other than itself to reveal it. Soul in itself, like its property, is therefore *jnana.* For distinguishing each from the other, these are called respectively *dharmi-bhuta-jnana* and *dharma-bhuta-jnana*, substance-knowledge and quality-knowledge. Thus it is the characteristically essential nature of the soul to be knowledge. This is common to all souls and will be comprehended by the soul-experience that happens as the result of *karma-yoga* or *jnana-yoga.* For bringing about this result of it, namely soul-experience, (*atma-sakshatkara*), the *yoga* requires the knowledge-part of it to develop so as to make the *yogin* see clearly that the soul everywhere is the same in its essential characteristic of being 'knowledge.' In order to attain this development of knowledge, the *yogin* has to observe certain austerities:—

1. Riddance of jubilance and detestation ;
2. Lack of attachment to worldly things ;
3. Appreciation of their defects ;
4. Removal of desire and anger ; and
5. Considering the soul alone as all-enjoyable.

There is another subsidiary which helps to make mature the knowledge of the soul involved in the *karma-yaga*, and which Sri Desika points out, as more important, more important than all those mentioned above, and that is what is called सर्वभूतहिते रतत्वं, keen *interest in the good of all beings.*

Thus, according to the *sloka*, this chapter is concerned with:

1. The superiority of the *karma-yoga* over the *jnana-yoga* on account of its being easier of practice and yielding the result more quickly.

2. Some subsidiaries of *karma-yoga*, viz. the transference of the agency for all actions to the organs, body and breath; and

3. The means of developing the soul knowledge that forms part of the *karma-yoga*, to such an advanced stage in which it will comprehend the soul in its essential characteristic of being *jnana*, knowledge, a characteristic common to all the souls indwelling innumerable and divergent forms.

6 *a*. The next stanza which relates to the sixth chapter says that in this chapter instruction is given in the method of practising *yoga*. When the *karma-yoga* or the *jnana-yoga* is advanced through diligent, efficient and continued practice, to such an extent that it is capable of bringing about the result, viz. soul-realisation, the *yogin* should adopt and follow the method described herein for the actual achievement of the result.

He should provide himself with a seat (*asana*) firm and comfortable. Seating himself on it, with his eyes fixed on the tip of his nose and without looking at this or that side he should concentrate his mind on the soul. He should observe continence. There should not be too much of food or sleep, complete avoidance of it either.

When the *yogin* finds himself so firm and steady and so occupied in the concentration that he may be likened to

999



the undisturbed flame of a light in a windless place he may be said to be well in the posture conducive to the effective *yoga*. The ultimate and actual *yoga* or the soul-experience is that in which the mind under control finds much interest, in which the *yogin* experiencing his own self feels so contented as not to think of anything else in which he feels enjoying the greatest pleasure in the world which he would not let pass away and finally in which, having been once in he will be never affected in the least by any calamity that may overtake him. To attain this stage is the consummation of the *yoga* and the aim and object of the *yogin.*

(*b*) The sloka then points out that the chapter next speaks of four kinds of *yogins*. This means that there are four degrees or levels in the self-realisation brought about by the *yoga*.

In the first, the *yogin* sees his soul, as has been already explained, as 'knowledge.'

In the second, which is higher than the above, he sees it as free from all sins and virtues, free from all *karma*, as the Supreme Soul Itself.

In the third, which is still higher, he sees it with its knowledge, its cognitive capacity, धर्मभूतज्ञान, having no restriction whatsoever and quite similar to that of the Supreme Soul.

In the fourth and last, which is the highest level in the soul experience, he sees it as having absolutely no connection with any good or bad that may happen to him, as the birth of a son or the death of his son.